नरप्रलये शेषमुखोद्भूतरुद्रगणाग्निज्वालानलेनेदं दह्यमानं इति मस्तकस्याधीश्वरस्तु इत्य सत्याभिप्रायो वर्तमाननिर्देशः निरीक्ष्य त्रिकालज्ञान
बलाद्दृष्ट्वा परोक्षं दृष्ट्वेत्यर्थः जनलोके स्थित्वाकल्पान्ते ततउपैतीत्ययमर्थो नुपपन्नः पुण्यपापविधूननस्योक्तत्वेन … तत्रावस्थितिहेतुकर्मा
भिवात्तेरमुलोके ह्यवस्थित्ययोगात् अतो दोषं दृष्ट्वा द्वैपरार्ध्यं द्विपरार्धस्थायि सिद्धेश्वरैर्जुष्टानि धिष्ण्यानि यानानि यस्मिंस्तत्पदं पारमेष्ठ्यं

तद्विश्वनाभिं त्वतिवर्त्य विष्णोरणीयसा विरजेनात्मनैक नमस्कृतं ब्रह्मविदामुपैति कल्पायुषो यद्विबुधा रमंते २५ अथो अनं
तस्य मुखानलेन दंदह्यमानं स निरीक्ष्य विश्वं निर्याति सिद्धेश्वरयुष्टधिष्ण्यं यद्द्वैपरार्ध्यं तदु पारमेष्ठ्यं २६ न यत्र शोको न
जरा न मृत्युर्नार्तिर्न चोद्वेग ऋते कुतश्चित् यच्चित्ततोदः कृपयानिदंविदां दुरंतदुःखप्रभवानुदर्शनात् २७ राम राम राम:

चतुर्मुखसंबंधिस्थानं याति निर्यातीत्यर्थः वक्ष्यमाणदिव्यविमानवर्त्तसिद्धा २६ चतुर्मुखलोकस्य स्वर्गाद्यपेक्षया चिरकालस्थायित्वमभि
भिधाय तत्राह नयत्रेति यत्र तत्र दुरंतदुःखप्रभवानुदर्शनादित्युपरितनेनान्वयः आर्तिर्दुःखं उद्वेगो मनःक्षोभः भयमागामिदुःखदर्शन
जं ज्ञानं कुतश्चिदित्यस्य यमित्यनेनान्वयः कुतश्चिद्धेतोस्तानपातत्वर्थादिभ्यः एवंविधेपि चतुर्मुखलोके ब्रह्मविदां निर्वेदमाह यच्चित्ततः इति
यद्यस्मादित्यर्थः अनिदंविदां इदंशब्दवाच्यपरिदृश्यमानप्रपंचविलक्षणपरब्रह्मविदां क्रियया कर्मणा हेतुभूतेन दुरंतदुःखमित्रिवाशेना
नात दुरंतमपारं यद्दुःखं तस्य प्रभवः प्रभवत्यस्मादिति प्रभवः दुःखहेतुभूतसंसारस्यानुदर्शनं उत्प्रेक्षणं तस्माच्चित्ततश्चित्तेनादः दु
रंतदुःखमिति यच्चतुर्मुखलोकेपि ब्रह्मविद्भिः कर्महेतुकं दुरंतदुःखं चिंतितानानुभूयत इति यत्ततरावरेतो विशेषप्रतिपद्येत्युत्तरे
णान्वयः अर्थी तात्परत्वमनेनैव यत्र मध्यमाकारवाक्यस्थात् यस्माद्धिरण्यगर्भस्य चिंतनं तदुपासनात् अहमस्यस्यां तदुपासकैर्लो

श्री·द्वि·भा·टी· १२

तेनेति अवसाने प्रकृतेः एवधौ गौरलाद्युत्तवतीस्मात्तनिश्री नित्यासततविक्रियेति प्रकृतेर्नित्यत्वाद्देशावधिरवसानशब्दार्थः स्वकीयभूतसूक्ष्मे
न्द्रियाणां त्वकारणे ऽस्मृत्यो वा अवसानशब्दो विवक्षितः तेनात्मनाविरजसा स्वरूपेणोपलक्षितं शांतमूर्मिषट्करहितमानंदं निरतिशयानंदस्वरूपं पूर्व
स्मान्नंनानंदं परमात्मसाम्यापत्यानंदमयः स्वयं निरतिशयानंदस्फुरः उपैति आत्मानंदशब्दाभ्यां आत्मनः आकाशः संभूतः आनंदो ब्र
ह्मेति व्यजानादित्युपनिषत्प्रसिद्धं तात्पर्यं वाक्यद्वयं स्मारितं एवंभूतं तमसस्परं तमसः परस्तादादित्यवर्णं तमसः परस्तादित्युक्तं परमे व्योमन्नित्युक्तरूपं
ति धूम्रधाम नितयमो काशस्था भगवत्प्राप्तिरर्चिरादिना गतस्योक्ता एवं स एतान् ब्रह्म गमयतीत्यस्यार्थ उक्तः अथ धूममार्गो विंशद्भिर्मार्गैर्धूमा
णोऽकलत्वकल्पान्ते तेन प्रतिपाद्यमानोऽस्यैव शास्त्रार्थमाह एतामिति भागवतीं भगवद्विशेषं गतिमर्चिरादिमार्गो योऽनंतः मध्वनः शिरप्रक्रांतिमंडलं गं
मोधीनदेहं श्रतिन विषकृतेनासक्तो भवति ३१ अथ मार्गद्वयमुक्तं निगमयति एते इति इमौ मार्गौ अर्चिरादिधूमादिमार्गौ वेदगीते ये चेमे ऽरण्ये श्रद्धा तप इत्युपा

13 तेनात्मनात्मानमुपैति शांतमानंदमानंदमयोऽवसाने एतां गतिं भागवतीं गतो यः स वै पुनर्नेह विषज्जतेऽङ्ग ३१ एते सृती ते नृप वेदगीते त्वयाऽभिपृष्टे च सनातने ६८
नेच ये वै पुरा ब्रह्मण आह पृष्ट आराधितो भगवान् वासुदेवः ३२ न ह्यतोऽन्यः शिवः पंथा विशतः संसृताविह वासुदेवे भगवति भक्तियोगो यतो भवेत् ३२

एते ते सृती मार्गौ अभिसंभवंति अथ य इमे ग्राम इष्टापूर्ते दत्तमित्युपासते ते धूममभिसंभवंतीत्यादि वेदबोधिते ऽत एव सनातने नित्ये ऽत एव सृती हे नृप त्व
याभिपृष्टे च यच्छ्रुतं त्वया मित्यनेनार्चिरादिमार्गस्य धूमादिमार्गस्यापि पृष्टत्वात् चकारः मया कथितेत्यर्थः सनातनत्वं विशदयति ये इति ये वै ये सृती
पुरा कल्पादौ ब्रह्मणे चतुर्मुखाय आराधितः सम्यगुपासनया प्रीतः वासुदेवः सर्वभूतांतरात्मा भगवान् आह उवाच तस्मात् सनातन इत्यर्थः ३२ संसारिणो
र्चिरादिप्राप्तौ भक्तियोगादन्य उपायो नास्त्यर्चिरादिगतिचिंतापि भक्तियोगोपायत्वादस्तीति अतो ऽर्चिरादेरन्यः अपरः संसृतौ संसारे शिवः पंथाः
कल्याणरूपो मार्गो न विश्रुतः विशेषेण न श्रुतः यतः अर्चिरादिमार्गचिंतनात् वासुदेवे सर्वगे उत्तमे भगवति परमात्मनि भक्तिर्भवेत् तस्मात् चिंता च
कार्या तथा च भगवता प्रोक्तं योगिनः प्रतिस्मर्यते तस्मात् चैते योगिना योगाभिष्टान्प्रतिस्मार्तव्ये स्मृतिविषयस्ते स्मृते ध्येदेव ध्यानपितृयाणे गती इन्न रामः
यैते योगांगतया नु दृढं नैते सृती पार्थ जानन् योगी मुह्यति कश्चन तस्मात् सर्वेषु कालेषु योगयुक्तो भवार्जुनेति स्मरणादिति भावः ३२ १२

गच्छतो मुक्तस्य सूक्ष्मदेहस्थेंद्रियैस्तन्मात्रग्रहणमाह घ्राणेनेति ब्रह्मलोकपर्यंतेषु बाह्यादिष्वनादेशो ऽभिप्रेतः आवरणीभूतगुणानां त्या-
गितत्वे भोग्यत्वात्तत्र गंधादीन् गृह्णातीत्यभिप्रायः घ्राणेन स्वकीयघ्राणेंद्रियेण गंधमावरणपृथिवीभूतगंधं एवं च रसनेंद्रियेण रसं दृष्ट्या चक्षु-
रिंद्रियेण रूपं तेजोगुणं त्वचा त्वगिंद्रियेण एवकारः सैः कार्याभावद्योतकः श्वसनेन वायुगुणं स्पर्शं श्रोत्रेंद्रियेण नभोगुणत्वं स्वार्थे त्वप्रत्ययः प्रा-
णेनांतःकरणेनाकूतिमभिप्रायं समानी व आकूतिरितिश्रुतं अत्र प्राणशब्देनेंद्रियवृत्तिहेतुभूतमुख्यप्राणो न विवक्षितः तेनाकूतिग्रहणासं-
भवादंतःकरणं विवक्षितं अंतःकरणप्रवृत्तौ हि अभिप्रायः एवं घ्राणादिभिर्गंधादीनुपेत्य तत्तद्भूतभेदनदशायां तत्तद्गुणान् गृह्णन्नुपैतीत्यर्थः २९
अथाहंकारमाह सत्त्विरतीनामतिक्रममाह सहेति सयोगी गत्यागमनेन विकार्यं ह्रस्वेण परिणामिनमहंकारं संप्राप्येत्यन्वयः विकार्यमेवेशिन वि२
ष्टि देवमयं दिग्वातादिदेवाधिष्ठितेंद्रियकारणं मनोमयं मनःकारणं भूतसूक्ष्मेंद्रियसंनिकर्षं भूतान्याकाशादीनि तत्सूक्ष्माणि शब्दादीनींद्रि-

घ्राणेन गंधं रसनेन वै रसं रूपं तु दृष्ट्या श्वसनं त्वचैव श्रोत्रेण चोपेत्य नभोगुणत्वं प्राणेन चाकूतिमुपैति योगी २९॥
स भूतसूक्ष्मेंद्रियसंनिकर्षं मनोमयं देवमयं विकार्यं संसाद्य गत्या सह तेन याति विज्ञानतत्त्वं गुणसंनिरोधं ३०॥

याणि ज्ञानकर्ममयेंद्रियाणि एतेषां संनिकर्षं कारणं भूतसूक्ष्मसंनिकर्षत्वेंद्रियसंनिकर्षत्वाभ्यां त्रिविधाहंकारभेदानामसात्विकाहं-
कारवृत्तौ मनोमयं देवमयमिति च सात्विकाहंकारकार्यप्रदर्शनं देवमयमित्यनेन वैकारिकस्तत्कार्यप्रदर्शनं इंद्रियसंनिकर्षत्वमनो-
मयत्वोक्तिः इंद्रियस्यावनुग्राहकराजसाहंकारग्रहणाय अतएव राजसाहंकारस्य न पृथक्कार्यप्रदर्शनं तस्यानुग्राहकमात्रत्वेन
पृथक्कार्यत्वाभावात् एतच्चाग्रे स्फुटीभविष्यति तेनातिक्रांताहंकारेण सहोपलक्षितः विज्ञानतत्त्वं महत्तत्त्वं याति विज्ञानसारथिर्य-
स्तु बुद्धिं तु सारथिं महात्मेति बुद्धिलक्षण इति वचनाभेकार्थ्यात् गुणसाम्यावस्थप्रकृत्यतिक्रमणमाह गुणसंनिरोधमिति गु-
णानां सत्त्वरजस्तमसां संनिरोधः साम्यं यस्मिन् तत्प्रधानं यातीत्यर्थः ३० राम ॥ ॥ ॥ ॥ ॥ ॥

श्री०टि
भा०टि
१४

पिबंतीति भगवत आत्मनः परमात्मनः कथामृतं ये पिबंति ते विषयदूषिताशयं पुनंति त्वत्पदः कथामृतं वा कर्णेरूपैः पुटेः पात्रतस्माद् नतां इति कर्णौ रिवशी सद्भिः कै पुटेषु संभृतं पूरितं अनेन सत्संगे पयः प्रथमं भवितव्यमित्युक्तं भवति सत्संगवद्याख्या हरिकथाश्रवणेन विषयेः शब्दादिभिर्विदूषितं कलुषितमाशयमंतःकरणं पुनंति ततश्चागमोत्थविवेकः सत्संगवादिभक्तियोगं तस्य पदांबुजं व्रजंतीति तस्य भगवतः चरणसरोरुहयोरंतिकं समीपं व्रजंतीति प्राप्नुवंति प्रथमं सत्संगवातः श्रवणं ततो योगारंभः ततश्चागमोत्थविवेकादिसाधनसम्पन्नज्ञानज्ञानाभ्यासेन भक्तिरित्यंक्रमोऽत्रोक्तः ३७ इति द्वितीये द्वितीयः २ एवं मुमुक्षोर्भगवच्छ्रवणादिकं कर्तव्यमित्युक्तं अथ तद्वयतिरेकेण अवेनदृष्टपितृमन्यदेवतानां क्षुद्रफलत्वं वक्ष्यन्पूर्वोक्तमनुवदति एवमिति मनुष्येषु कदाचिद्देववशात्स्वभावात् प्राप्तेषु जीवेषु येमनीषिणः तेषां तत्रापि ये स्त्रियमाणास्तेषां विशेषात्

पिबंति ये भगवत आत्मनः सतां कथामृतं श्रवणपुटेषु संभृतं पुनंति ते विषयविदूषिताशयं व्रजंति तच्चरणसरोरुहांतिकं ३७ इति श्रीमद्भा०
द्वि२ द्वितीयस्कंधे द्वितीयोऽध्यायः २ श्रीशुक उ० एवमेतन्निगदितं पृष्टवान्यद्भवान्मम नृणां यन्म्रियमाणानां मनुष्येषु मनीषिणां १ ब्रह्मवर्चसकामस्तु यजेत ब्रह्मणस्पतिं इंद्रमिंद्रियकामस्तु प्रजाकामः प्रजापतीन् २ देवीं मायां तु श्रीकामस्तेजस्कामो विभावसुं वसुकामो वसून् रुद्रान्वीर्यकामोऽथ वीर्यवान् ३ अन्नाद्यकामस्त्वदितिं स्वर्गकामोऽदितेः सुतान् विश्वान्देवान्राज्यकामः साध्यान्संसाधको विशां ४

तेषु यत्कर्तव्यं तच्च प्रतिपन्नवान् तद्भगवच्छ्रवणादिकर्मेवेत्येवं निगदितं उक्तमित्यर्थः १ कामफलप्राप्त्यर्थमन्येषां देवतानां भजनमाह ब्रह्मवर्चसेत्यादिना ब्रह्मवर्चसं कामयमानः ब्रह्मणस्पतिं नेदपतिं यजेन भजेत इंद्रियकामः इंद्रियं सर्व्यकामः इंद्रं भजेत सा२
त्यनुषंगः एवमग्रेपि प्रजापतीन् दक्षादीन् २ देवीं देवस्य विष्णोः संबंधिनीं मायां विस्मयनीयशक्तिं विभावसुमग्निं वसुकामः अर्थकामः वसून्यजेत वीर्यकामस्तु रुद्रान्यजेत यजनफलमाह वीर्यवानिति भवेदिति शेषः इदं सर्वत्र तत्तत्फलावाप्तेरुपलक्षणं ३
अन्नं भोज्यमद्यं भक्ष्यं वरविशदमभ्यवहार्यमन्नं खरं कठिनं चर्व्यं विविक्तावयवं भक्ष्यमिति शेषः तत्कामोऽदितिं यजेत अ रामः
दितेः सुतान्देवान् आदित्यान् विश्वान्साधकः दिक्पतित्वकामः ४ राम राम राम राम रामः १५

कथं वा तद्देवे भक्तिरेवाचिराद्धिगतानुपाय इत्यत्राह भगवानिति एवमेव महाशब्दो मैत्रेयः भगवानित्यादिप्रकारेण भगवच्छब्दितः वासुदेव एव च
स जगत्कारणं तद्भक्तिरेव मोक्षोपायः कथमित्यत्राह कार्त्स्न्येनेति मनीषया बुद्ध्या कार्त्स्न्येन त्रिरन्वीक्ष्य सकलप्रमाणजातं मुहुर्मुहुरालोच्य आलो
अ सर्वशास्त्राणि विचार्य च पुनः पुनरिति वत् तदध्यवस्यति निश्चिनोति स्थितः किमध्यवस्यतीत्यत आह कूटस्थ इति निर्विकारपरमात्म निरतिशयानन्द आ
नंदः निरतिशयानंदपरमात्मानुभवजनितरसेति सर्वविस्मृतिचित्तशेषवशीघतेकारतिर्यतो भक्तियोगाद्धवे एवमत्युपायं निश्चितमतिपुणतरो लोकः स्थि
तइत्यर्थः ३४ ननु तीव्रिये भवति कथं भक्तिरुत्पद्यते कथं तरां रतिरित्याशंक्य परिशुद्ध मनो विषयत्वादुभयमपि संभवतीत्याशयेनाह भग ७५
वानिति स्वात्मना योगपरिशुद्धमनसा सर्वभूतेषु भगवान् लक्षितः साक्षात्कारार्हः मनसा तु विशुद्धेन मनसा भिक्षते इति श्रुते नार्हं
२ सविकियादिविषु यैते तो ह्यपरो वेत्यत आह द्व्या सर्वज्ञः न केवलं [illegible] परिशुद्ध मनो विषय एव प्रमाणान्तरविषयोपीत्याह बुद्ध्यादिभिः महा

भगवान् कृष्णः कार्त्स्न्येन त्रिरन्वीक्ष्य मनीषया तदध्यवस्यत्कूटस्थो रतिरात्मन्यतो भवेत् ३४ भगवान् सर्वभूतेषु लक्षितः स्वात्मना हरिः
दृश्यैर्बुद्ध्यादिभिर्द्रष्टा लक्षणैरनुमापकैः ३५ तस्मात्सर्वात्मना राजन् हरिः सर्वत्र सर्वदा श्रोतव्यः कीर्तितव्यश्च स्मर्तव्यो भगवान्नृणां ३६ रामः॥

त्वेवृद्धिलक्षण इति वचनात् कार्यभूतमहदादिभिर्द्रष्टा कारणभूतोनुमीयते इत्यर्थः न केवलमनुमानविषय एव किंतु शास्त्रविषयोपीत्या
५२ त्याह लक्षणैरनुमापकैरिति दृद्धयेन लक्ष्यंतीति लक्षणानि वेदान्तवाक्यानि सत्यज्ञानमनन्तं यतो वा इमानि भूतानि जायन्त इत्यादीनि तथा तद्रूपतः ५१
कारणत्वप्रतिपादकानि सदेव सोम्येदमग्र आसीदित्यादीनि तैरनुमापकैः स्मृतिवचनैः स्मृतीनां श्रुत्यनुमापकत्वाच्छ्रुतिस्मृतीभ्यामप्यु
पलक्षितः अनेन केवलानुमानगम्यत्ववादिनो वैशेषिका निरस्ताः तन्निरासस्तु शास्त्रयोनित्वादित्यधिकरणभाष्ये बुद्ध्यादिकार्य
वर्गैरुपलक्षितः जगत्कारणं तथा शास्त्रैः प्रतिपन्नः तस्य रूपं तु योगपरिशुद्धमनसा साक्षात्कुर्वतीत्याग मोत्यविवेकजन्यज्ञान विषयत्व वि
षयत्वमुक्तं भवति ३५ यच्छ्रोतव्यमित्यादि प्रश्नोत्तरमुपसंहरति तस्मादिति स्पष्टोस्यार्थः ३६ अस्तु योगपरिशुद्धमनोग्राह्य
त्वं योगारंभो वा कथं स्यादित्यत आह राम राम राम राम राम राम राम राम रामः

न२ बार

ध्यामिति यावत् हरिकथामृतेनान्तर्हिंसेव प्रपन्नतेनालं हरिकथामृतरतिं को न कुर्यादित्यन्वयः यदा हरिकथा न तिष्ठति तदा यां प्रति खलाः गुणाः स्या
श्री·द्वि· हिकार्या गुणमयः क्षुधा नापिपासा शोक मोह जरा मृत्यु वो यस्मात्तथाभूतं ज्ञानं प्रसादश्चित्तनैर्मल्यं उभयत्र लोकद्वये गुणेषु शब्दादिषु
भा·टी· विषयेष्वसंगो वैराग्यं कैवल्यसंज्ञो संमतः पंथा उपायः केवल्यसंमतपथः कथा भूतो भक्तियोगश्चेत्येते संपद्यन्ते तथाभूतो हरिकथासु रति
१५ निर्वृतः सुखितः रतिमाह क्रिं को न कुर्यात् सर्वोपि कुर्यादेवेत्यर्थः १२ एवं हरिकथाप्रभावं उक्त्वा पुनर्जगद्धापारूप हरिकथैव स्याः
मुनिरूपयोर्संवादमवतारयितुं शौनकः पृच्छति इतीत्यादिना इतिपूर्वोक्त प्रकारेणाभिव्याहृतं निशम्य श्रुत्वा भरतर्षभः भरतवंशश्रे
ष्ठः राजा परीक्षित् ऋषिं परब्रह्म दर्शिनं विशाखं वृत्तम्पि निशम्य तं वैयासकिं व्यासपुत्रं श्रीशुकं प्रत्यन्यत् किं पृष्टवान् १३ एतच्छुश्रूषतां नः भावं

ज्ञानं यदा प्रतिनिवृत्तगुणोर्मिचक्रमात्मप्रसादउभयत्र गुणेष्वसंगः कैवल्यसंमतपथस्त्वथ भक्तियोगः को निर्वृतो हरिकथासु रतिं न कु
र्यात् १२ शौनक उ० इत्यभिव्याहृतं राज्ञा निशम्य भरतर्षभः किमन्यत् पृष्टवान् भूयो वैयासकिमृषिं कविं १३ एतच्छुश्रूषतां विद्वन् सूत नोऽर्ह
सि भाषितुं कथा हरिकथोदर्काः सतां स्युः सदसि ध्रुवं १४ स वै भागवतो राजा पांडवेयो महारथः बालक्रीडनकैः क्रीडन् कृष्णक्रीडां
15 य आददे १५ वैयासकिश्च भगवान्वासुदेवपरायणः उरुगायगुणोदाराः सतां स्युर्हि समागमे १६

हे सूत हे विद्वन् भाषितुं वक्तुमर्हसि
तच्छुश्रूषतां वक्तोत्साम् भवतीति चेत्तत्राह कथा हरिकथैव उदर्कः उत्तरफलं यासां ताः हरिकथोदर्काः हरिकथा प्रधाना इत्यर्थः तथा भूताः
कथाः सतां भगवद्भक्तानां संसदि सभायां राजाभ्युक्तयोः स्युः ध्रुवं निश्चयः अतो भगवत्कथाश्रवणमेव लाभ इति भावः १४ भगवद्भ
क्तत्वमेवाह स वै इति तद्वर्द्धन पांडवेयो महारथो राजा सान्द्र भागवतः यो राजा बालक्रीडनकैः बालक्रीडाभिः क्रीडन् कृष्णक्रीडां श्रीकृष्ण
सेवारूपां क्रीडामाददे तस्य क्रीडाप्यपि श्रीकृष्णसेवारूपा एवातः आबाल्यं भागवत इत्यभिप्रायः १५ ... वृत्तं निष्कलंयं चैव सत्ता
नामित्यादिगुणविशिष्टो वैयासकिः वासुदेवः परायणं परमं प्राप्यं परमोपायश्च यस्य सतथोक्तः एवमुभयोरपि भागवतत्वात्तत्संवाद रासः
एव पृच्छ्य इत्याह हियस्मात् सतां भागवतानां समागमे संगते उरुगायस्य भगवतो गुणैरुदाराः महत्यः कथाः स्युः प्रेमा भवेयुः १६ १५

पुष्टिरिंद्रियबलं तत्कामः इलां पृथ्वीं यजेत् प्रतिष्ठाकामः स्थानादप्रच्युतिकामः रोदसी द्यावापृथिव्यौ तयोः सर्वलोकाधारत्वात् मातरत्वं ५ रूपम
भिकामः गन्धर्वान् अप्सरोजास्तासा उर्वशीं चतं सर्वेषामाधिपत्यकामः प्रभुत्वकामः परमेष्ठिनं ब्रह्माणं ६ यज्ञं विष्णुं कोशावसंसंचयः वसुकाम
इत्यत्र धनमात्र इति भेदः प्रचेतसं वरुणं विद्याकामः ज्ञानकामः दांपत्यार्थं दंपत्योरन्योन्यप्रीत्यर्थं स तेभिस्तु मा विशेषणं पतिव्रतामुमां देवीं गि
त्य रिशं ७ उत्तमश्लोकं विष्णुं तंतुं संतानं तन्वन् विस्तारयन् संतानसमृद्धिकाम इत्यर्थः रक्षाकामः बाधनिवृत्तिकामः भोगेच्छु पुण्यजनान्यक्षा
नोजस्कामः बलकामः ८ राज्यकामः मनून् देवान् अभिचरन् शत्रुमरणेच्छुः निर्ऋतिं रा, इस कामकामः भोगेच्छुः ९ अकामः वैराग्य
कामः परं पुरुषं परमपुरुषं यो यो यां यां तनुं भक्तः इति रीत्या इन्द्रादिरूपेणापि परमपुरुषस्यैव तत्फलदत्वात् तत्तत्फलेप्सुभिरिज्यमा॰

आयुःकामोश्विनौ देवौ पुष्टिकाम इलां यजेत् प्रतिष्ठाकामः पुरुषो रोदसी लोकमातरौ ५ रूपाभिकामो गंधर्वान् स्त्रीकामोप्सर उर्वशीं आ
धिपत्यकामः सर्वेषां यजेत परमेष्ठिनं ६ यज्ञं यजेद्यशस्कामः कोशकामः प्रचेतसं विद्याकामस्तु गिरिशं दांपत्यार्थ उमां सतीं ७ धर्मार्थ उ
त्तमश्लोकं तंतुं तन्वन् पितॄन् यजेत् रक्षाकामः पुण्यजनानोजस्कामो मरुद्गणान् ८ राज्यकामो मन्वन्तरान् देवान् निर्ऋतिं त्वभिचरन् यजेत् काम
५का कामो यजेत्सोमं अकामः पुरुषं परं ९ अकामः सर्वकामो वा मोक्षकाम उदारधीः तीव्रेण भक्तियोगेन यजेत पुरुषं परं १० एतावानेव यज
तामिह निःश्रेयसोदयः भगवत्यचलो भावो यद्भागवतसंगतः ११

तं परमपुरुषमेव तत्तत्फलानि प्रयच्छति
मिति रीत्यानुभजमानस्य तावन्मुक्तिं प्रयच्छतीत्यभिप्रायः उदारधीरिति मोक्षकामविशेषणं तीव्रेणास्त्र विच्छिन्नेन भक्तियोगेन
१० एव वैतत्संगात् भगवत्यचलो भाव इति यत् भागवतसंगात् भगवत्यचले भावे सति निःश्रेयसोदयः सिद्धाव तस्माद्भागवतसंगा
त् अचलो भाव एव याह्य इति भावः ११ यद्भागवतसंगत इत्यनेन सूचितां हरिकथां प्रस्तौति ० श्रीमते रामानुजाय नमः रामः रामः
भजद्भिः कदाचिदेवावाप्यत इत्यत आह एतावानिति इहास्मिन् लोके नराणां निःश्रेयसस्य मोक्षस्योदयो लाभः एतावान् एतदवधिकः भाग २

श्री·द्वि० भागवतांघ्रिरेणुं जातु कदाचिदपि यस्तु मर्त्यो मनुष्यः नाभिलभेत नाभिजानन् स्पृशेन्न धारयेत् स जीवन्नपि शवः जीवन्नपि शवतुल्यः श्रीविष्णुपद्याः

भा·टी· श्रीविष्णुपद्याः तुलस्याः गन्धं यस्तु मनुजो न वेद नाभिजानन्नाभिजानन् इत्यर्थः स श्वसन् जीवन् प्राणयुक्तोऽपि शवः शवतुल्यः २३ गृह्यमाणैः

१६ स्मरणकीर्तनादिभिर्गृह्यमाणैर्भगवन्नामभिर्यदीयं हृदयं न विक्रियेत विकारं न प्राप्नुयात् अथ यदा विकारः नेत्रे जलं मानन्दाश्रु विद्यते गात्र

रुहेषु हर्षः रोमांचश्च न स्यात् तद्धृदयमश्मसारं काठिन्यमवतेति खेदे यदा मनोविकारो भवति तदा आनंदाश्रु रोमांचश्च स्यादित्यर्थः २४ भागवतप्रधा

नत्वं मनसोऽनुकूलं प्रियं भाषते सुपृष्टः सन् आत्मविद्याविशारदः निपुणः वैयासकिः श्रीशुकः नृपं यदाह तदभिधेहि त्वं ब्रूहि २५ इति द्वितीये

तृतीयोऽध्यायः ३ एवमाद्यैः सतो राज्ञः प्रश्नं कथयितुं तस्य प्राक्तनीं स्थितिमाह वैयासकेरिति वैयासकेः श्रीशुकस्यात्मनः तत्त्वनिश्चयं प्रतिपाद्य वचः

२१ जीवंछवो भागवतांघ्रिरेणुं न जातु मर्त्योऽभिलभेत यस्तु श्रीविष्णुपद्या मनुजस्तुलस्याः श्वसंछवो यस्तु न वेद गंधं २३ तदश्मसारं हृदयं बतेदं यद्गृ

ह्यमाणैर्हरिनामधेयैः न विक्रियेताथ यदा विकारो नेत्रे जलं गात्ररुहेषु हर्षः २४ अथाभिधेह्यंग मनोऽनुकूलं प्रभाषसे भागवतप्रधानः यदाह

वैयासकिरात्मविद्याविशारदो नृपतिं साधुपृष्टः २५ इति श्रीभाग० द्वितीयस्कंधे शौनकवाक्यं नाम तृतीयोऽध्यायः ३ सूत उ० वैयासकेरिति वचस्त

त्त्वनिश्चयमात्मनः उपधार्य मतिं कृष्णे औत्तरेयः सतीं व्यधात् १ आत्मजायासुतागारपशुद्रविणबंधुषु राज्ये चाविकले नित्यं विरूढां ममतां जहौ २ पप्र

च्छ चेममेवार्थं यन्मां पृच्छथ सत्तमाः कृष्णानुभावश्रवणे श्रद्दधानो महामनाः ३ संस्थां विज्ञाय संन्यस्य कर्म त्रैवर्गिकं च यत् वासुदे

वे भगवति ह्यात्मभावं दृढं गतः ४

स्वरूपनिश्चायकं वचः इत्युक्तप्रकारेणोपधार्य श्रुत्वौत्तरेयः उत्तरापुत्रः राजा श्रीकृष्णे सतीं मतिं व्यधादकरोत्

१ किंच आत्मेति आत्मा देहः द्रविणं धनमात्मादिषु अविकले निरुपद्रवे राज्ये च निरूढां नित्यरूढां ममतां त्यक्त्वाभिमतिं तत्याज २ हे सत्तमाः शौनका

दयः इममेव हरिकथालक्षणमेवार्थं पप्रच्छ मां प्रति यत्पृच्छथ यूयं कथंभूतः पप्रच्छ श्रीकृष्णानुभावश्रवणे श्रीकृष्णलीलाश्रवणे श्रद्दधानः ॥

अत एव महायशाः ३ संस्थां मृत्युं विज्ञाय ज्ञात्वा त्रैवर्गिकं धर्मार्थकामसाधनं कर्म संन्यस्य त्यक्त्वा भगवति वासुदेवे स्वात्मभावं स्वस्यात्मत्वं॥ उँ नमः

ममात्मा वासुदेव इति विशेषं परं दृढं यतः प्राप्त इत्यर्थः एवंविधः परीक्षित्प्रष्टेति पूर्वेणान्वयः ४ रामः रामः रामः रामः॥ १६

द्वि

किंचयेवतीर्णामामायुर्हरिकथायामेवसफलंअन्यथाविनाशयेनाह आयुरितित्रिभिः असौसूर्यउद्यन्नुदयंप्राप्नुवन्नस्तंयन्तिरोधानंप्राप्नुव
न्निर्म्लोचन्नित्यर्थः उत्तमश्लोकस्यभगवतोवार्तयाः कथायायत्क्षणोनीतःयःक्षणोनीतः तस्यकृतेतंक्षणंविनासर्वमायुर्हरतिसक्षणो
नहृतःसफलइत्यर्थः १७ ननुजीवनमेवतदायुषःफलमस्तुतत्राह तरवइति उत्पत्तिनाशमध्यस्थितिजीवनं ननुतेषांश्वासोनास्तिन
त्राह भस्त्राइति चर्मकोशाःनश्वसंति किंवायुमूर्ध्वंननिःश्वसंति किं ननुतासामाहारादिकंनास्तितत्राह ग्रामपशवःअपरेआयु
र्व्ययंकुर्वंतस्त्वनखादंतिनाश्नंतिनमेहंतिनरेतःसिंचंतिमैथुनंनकुर्वंतीत्यर्थः १८ विड्वराहोग्रामसूकरः १९ बिलइति उरुक्रमस्य

आयुर्हरतिवैपुंसामुद्यन्नस्तंचयन्नसौ तस्यर्तेयत्क्षणोनीतउत्तमश्लोकवार्तया १७ तरवःकिंनजीवंतिभस्त्राःकिंनश्वसं
त्युतनखादंतिनमेहंतिकिंग्रामपशवोपरे १८ श्वविड्वराहोष्ट्रखरैःसंस्तुतःपुरुषःपशुः नयत्कर्णपथोपेतोजातुनामगदा
बर ग्रजः १९ बिलेवतोरुक्रमविक्रमान्येनशृण्वतःकर्णपुटेनरस्य जिह्वासतीदार्दुरिकेवसूतनचोपगायत्युरुगायगाथाः
२० भारःपरंपट्टकिरीटजुष्टमप्युत्तमांगंननमेन्मुकुंद शावौकरौनोकुरुतःसपर्यांहरेर्लसत्कांचनकंकणौवा २१ बर्हायिते
तेनयनेनराणांलिंगानिविष्णोर्ननिरीक्षतोये पादौनृणांतौद्रुममजन्मभाजौक्षेत्राणिनानुव्रजतोहरेर्यौ २२ राम राम राम राम

भगवतोविक्रमानपराक्रमान्येशृण्वतःश्रवणंनकुर्वतोनरस्ययेकर्णपुटेतेबिलेसर्पगर्ते हेसूतउरुगायगाथाःभगवत्कथाः दर्दुरपुंगा
यतितस्यजिह्वाःसतीदुष्टादार्दुरिकीमंडूकजिह्वेव २० यदिमुकुंदंननमेत्तन्नमस्कुर्यात्तदुत्तमांगंशिरःपट्टकिरीटजुष्टंपट्टेनशोभाढ्यंन खेर
किरीटेनवाजुष्टमपिपरंकेवलंभारः हरेःसपर्यांपूजांनोकुरुतःनकुर्वंतावेतौकरौहस्तौचलसंतौकांचनकंकणौययोस्तथाभूतावपिशावौ
शवस्यदेहिनाविवअमंगलावित्यर्थः २१ विष्णोर्लिंगानिमूर्तीःननिरीक्षतःपश्यतःनयनेबर्हायितेमयूरपिच्छनेत्रतुल्ये क्षेत्राणितीर्थानि
नानुव्रजतस्तौनृणांपादौद्रुमजन्मभाजौद्रुमजन्मभजतःइतितथा वृक्षमूलतुल्यावित्यर्थः २५

श्री०द्वि० भा०टि० १७ विचिकित्सितं एतत्सर्वो ब्रूतं मे मम विचारितमिदं भगवान्भवान्यथावद्ब्रवीतु त्वमेव कथयितुं समर्थ इत्याह शाब्दे ब्रह्मणि शब्दब्रह्मणि नि[ष्णा]तः भा२
परिनिष्ठितः कृत्स्नशास्त्रार्थवित् परस्मिंश्च ब्रह्मणि निष्णातः खल्विति अन्वयः अनेन परब्रह्मविषययोगजन्यज्ञानसंपत्तिरुक्ता ११ हरेर्गुणा २८
नुकथनद्रुत्युक्तप्रकारेण राज्ञा मंत्रितः प्रार्थितः हृषीकेशं भगवन्तं सर्वेन्द्रियनियंतारमनुस्मृत्य प्रवक्तुं देनतात्कृतनमस्कारादिरूपमुपक्रमं कृ
तवान् १२ तदेवाह त्रयोदशभिः नम इति परस्मै पुरुषाय निपुरुषविलक्षणाय पुरुषाय तत्र हेतुः भूयसे स्वरूपतो गुणतश्चानवधिस्वव्याप्यवते
मानाय तदेव दर्शयति सतः प्रपञ्चस्य उद्भवउत्पत्तिः स्थानं पालनं निरोधः संहारः तदेव लीलात्या गृहीतशक्तित्रितयाय गृहीतहिरण्यगर्भ
ब्रह्मावतारशंकररूप शक्तित्रितयं येन तस्मै अनेन वैलक्षण्यमुक्तं स्वरूपमाह अन्तर्भवायांतरात्मने अनेन सर्वस्य व्याप्यत्वात्तदपेक्ष
यास्व स्वव्यापकत्वमुक्तं अनुपलभ्यं वर्त्म यस्य तस्मै वर्त्मशब्दः गंतव्यमार्गपरोयत्रोपासनारूपज्ञानविषयीभूतभगवत्स्वरूपपरत्यादिपरः उपचारात्

विचिकित्सितमेतन्मे ब्रवीतु भगवान्यथा शाब्दे ब्रह्मणि निष्णातः परस्मिंश्च भवान्खलु ११ सूत उ० इत्युपामंत्रितो राज्ञा गुणानुकथने हरेः हृषी
केशमनुस्मृत्य प्रतिवक्तुं प्रचक्रमे १२ श्रीशुक उ० नमः परस्मै पुरुषाय भूयसे सदुद्भवस्थाननिरोधलीलया गृहीतशक्तित्रितयाय देहिनामंतर्भवा
यानुपलक्ष्यवर्त्मने १३ भूयो नमः सद्वृजिनच्छिदेसतामसंभवायाखिलसत्वमूर्तये पुंसां पुनः पारमहंस्य आश्रमे व्यवस्थितानामनुमृग्यदाशुषे १४

अनेन प्राकृतकरणागोचरत्वमुक्तं इदमपि वैलक्षण्यप्रतिपादकं १३ अनुपलभ्यवर्त्मत्वेऽनुपास्यत्वं स्यादित्यत आह भूयो नम इति सद्वृजिनच्छिदे सतां पा
पछिदे असतां दुष्कृतामसंभवाय विनाशाय अखिलसत्वमूर्तये अखिलं पूर्णं सत्वमेव मूर्तिर्यस्य तस्मै दुपात पूर्णसत्वदेहायेत्यर्थः स्वतो निंद्रियत्वेपि
लीलयातिशयेन साधुपरित्राणपद्कृतविनाशादिकं वदन अखिलमनुजनयनविषयतामसंस्मादिरूपागत इत्यर्थः प्रकृतिपुरुषविलक्षणात्सर्व
जगत्कारणत्वाद्वात्सल्यादिगुणवत्वाच्च मुमुक्षूपास्यत्वं मोक्षप्रदत्वं चाह पारमहंस्ये परमहंसानां संबंधिनि आश्रमे चतुर्थाश्रम इत्यर्थः तस्मिन्
व्यवस्थितानां इदं मुमुक्षूणां सायोपलक्षणं परमहंसानां प्रायेण मुमुक्षुत्वात्तदाश्रमनिर्देशः अन्यविधांगत्वेन तत्राश्रमस्य पुरुषधर्मानुष्ठानप राम:
राणामनुमृग्यदाशुषे अनुमृग्या आलक्षु सिद्धोर्थः नमस्यदाशुषे दानशीलाय एवंभूताय भूयो नम इति १४ राम राम राम राम: १७

स्वबुद्ध्युत्क्षिप्तमवतारयितुं स्तुतिवचोभिनंदति समीचीनमिति हे ब्रह्मन्नयं मह्यं हरेः कथाः कथयतः सर्वज्ञस्य तव वचः समीचीनं यतस्तमोऽज्ञानं विशीर्यते
तेन श्यपति ५ बुभुक्षितं पृच्छति भूय इति भूयः पुनः विवित्सामि वेदितुमिच्छामि अधीश्वरैर्ब्रह्मादिभिर्दुर्विभाव्यमप्रतर्क्यं इदं विश्वं यथा सृजति य
थायोगोपायति रक्षति यथा पुनः संयच्छति संहरति पुरुशक्तिरनंतशक्तिः परः पुमान्परमपुरुषः यां यां ब्रह्मादिरूपां शक्तिं शरीरं उपाश्रित्याधिया
य ७ आत्मानं ब्रह्मरुद्रादिभेदेन स्वात्मानं क्रीडयन् सृष्ट्यादिव्यापारविशेषाभिनिविष्टं कुर्वन् स्वयं क्रीडन् सृष्ट्यादिव्यापारं कुर्वन् करोति स्वयमे
व नन्दन् तत्र तया सृष्ट्यादिव्यापारं करोति विकरोति विहरं करोति ८ उपसंहरति इदं जगद्व्यापाररूपा क्रीडा स्वातं आप्तकामत्वात् नतु बालादीनामिव
कर्मफलेनाभिप्रायः हे भगवन्नद्भुतकर्मणः विस्मयनीयव्यापारस्य हरेः विचेष्टितं कविभिर्ज्ञानानैरपि दुर्विभाव्यमप्रतर्क्यमिवाभाति प्रती ती

राजोवाच समीचीनं वचो ब्रह्मन्सर्वज्ञस्य तवानघ तमो विशीर्यते मह्यं हरेः कथयतः कथाः ५ भूय एव विवित्सामि भगवानात्ममायया
यथेदं सृजते विश्वं दुर्विभाव्यमधीश्वरैः ६ यथा गोपायति विभुर्यथा संयच्छते पुनः यां यां शक्तिमुपाश्रित्य पुरुशक्तिः परः पुमान् ७ आ
त्मानं क्रीडयन् क्रीडन् करोति विकरोति च ८ नूनं भगवतो ब्रह्मन् हरेरद्भुतकर्मणः दुर्विभाव्यमिवाभाति कविभिश्चापि चेष्टितं ९
यथा गुणांस्तु प्रकृतेर्युगपत्क्रमशोऽपि वा बिभर्ति भूरिशस्त्वेकः कुर्वन्कर्माणि जन्मभिः १० श्रीमतरामानुजाय नमः ॥

यते ९ अन्यदपि पृच्छति यथेति एक एव जन्मभिरवतारैर्भूरिशः कर्माणि चेष्टितानि कुर्वन् प्रकृतेर्गुणान्सत्त्वादीन्युगपदथवा क्रमशः य
था बिभर्ति अत्र यथा सृजतीति सर्गादानाधिकरणो नो प्रश्नः यथा गोपायतीत्यनेन रक्षितुः स्वस्य किं सृष्ट्यादाविव रक्षणेऽपि जीवान्त
र्यामित्वेनोत स्वावतारेणैव रक्षणमिति प्रश्नः यथा संयच्छत इत्यनेन संयमाधिकरणो प्रश्नः नादेयानां प्रश्नानां तत्रैवाव
तरिष्यमाणत्वात् यथा गुणांश्चित्यनेन भगवदवतारस्य गुणत्रयात्मकत्वमथवा त्रयाणामेव अन्यतमगुणात्मकत्वम
थवाऽप्राकृतत्वमेवेति प्रश्नः अत्र यद्यपि ननतीयपद्यतः प्रश्नाहः तथापि प्रश्नरूपमभिप्रेतः तस्यैव सिद्धांतकोटित्वात् १०

श्री·द्वि· भक्तिशून्यानां सर्वाण्यपि साधनानि निष्फलानीत्याह तपस्विन इति तपस्विनः कृच्छ्रचांद्रायणादितपोनिष्ठाः मनस्विनः मनआदीन्द्रियनिग्रहपराः
भा·टी· मंत्रविदः मंत्रजापपराः सुमंगलाः सदाचारपराः एते सर्वे तपआदेर्यदर्पणं यस्मिन् भगवति समर्पणं यदुपासनांगत्वेनानुष्ठानं विनेति यावत् क्षेमं त
१८ तपआदेः परमं फलं न विंदंति न लभंते यद्यपि किंचित् स्वर्गादिरूपं फलमाप्नुवंति तथापि नाशवत्फलमाप्नुवंति भक्तियोगांगत्वेन त
पआदिकं कुर्वाणास्तु निरतिशयं फलं प्राप्नुवंतीत्यभिप्रायः १८ किं वक्तव्यं भागवतास्तावत् विशोध्य ब्रह्म प्राप्नुवंति भागवताश्रिता हीनजा
तीया अपि प्राप्नुवंतीत्याह किरातेति किरातादयो हीनजातयः अन्ये च ये पापाः पापजातयः यदुपाश्रयाः यं परमपुरुषमुपाश्रिता यदुपाश्र ती
अं६ या भागवतास्तदाश्रया भागवताश्रिताः शुध्यंति असंभावनाशंकां परिहरति प्रभविष्णवे प्रभवनशीलाय पूर्वोक्तेन तपआदीनां फलप्रदायेत्य

18 तपस्विनो दानपरा यशस्विनो मनस्विनो मंत्रविदः सुमंगलाः क्षेमं न विंदंति विना यदर्पणं तस्मै सुभद्रश्रवसे नमो नमः १८ किरा
तहूणांध्रपुलिंदपुल्कसा आभीरकंका यवनाः खसादयः येन्ये च पापा यदुपाश्रयाश्रयाः शुध्यंति तस्मै प्रभविष्णवे नमः १९ स ए
ष आत्मात्मवतामधीश्वरस्त्रयीमयो धर्ममयस्तपोमयः गतव्यलीकैरजशंकरादिभिर्वितर्क्यलिंगो भगवान्प्रसीदतां २०

यैः अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव चेति भगवद्वचनात् सर्वकर्मफलप्रदत्वेन सर्वसाधनानां तत्समर्पणमेव युक्तमिति भावः १९ एतदेवो
पपादयति स एष इति एष आत्मा परमात्मा आत्मवतां केवलयोगनिष्ठानामधीश्वरः योगफलप्रदः त्रयीमयः पूर्वभागोक्तकर्माराध्य
स्तत्फलप्रद इत्यर्थः धर्ममयः स्मार्तदानादिधर्माराध्यः तत्फलद इत्यर्थः तपोमयः उपनिषद्भागोक्तोपासनात्मकज्ञानमयः तज्ज्ञानप्राचुर्य
त वेद्यस्तत्फलद इत्यर्थः ननु देवतानां तत्तत्फलदातृत्वश्रवणात्कथं तस्यैव सर्वकर्माराध्यत्वमित्यत आह गतव्यलीकैर्गतदोषैरजशंकरादिभिर
प्यहमादिभिर्वितर्क्यलिंगः निश्चेतुमशक्यं लिंगं लक्षणं चिह्नं यस्य सः ब्रह्मादयोपि यदीयं लक्षणं वितर्कयंति तथाभूतः तेषामप्यंतरात्म
त्वेन उपास्यस्तत्तद्ब्रह्मादिरूपेण फलद इति ध्येयं एवंविधभगवत्प्रसादं स्वस्य प्रार्थयति भगवानिति अनेन देवताविशेषश्च विवक्षितः २० रामः
१८

श्री१ सोऽत्वाथावितं सुमेव नमस्करोति नमइति सात्वतां यदूनां ऋषभाय श्रेष्ठाय भक्तानां वा सत्यातिरेकाज्ञात्वत श्रेष्ठत्वेनावतीर्णायेत्यर्थः एवंभूतो
पि कुयोगिनां दुर्लभ एवेत्याह विदूरकाष्ठायेति कुयोगिनां कुत्सितयोगिनां भगवद्भक्तिरहितयोगनिष्ठानां विदूरकाष्ठाय विदूरं तएवकाष्ठादिक् य
स्य तस्मै कुयोगिभिर्यस्य दिगपि दुर्ज्ञेया तथाविधायेत्यर्थः तदेव वैषम्यप्रतीतावपि निर्दोषत्वाय चित्यैश्वर्यमाह निरस्तेति स्वराधसा स्वतेजसा^
निरस्ते साम्यमतिशयश्च यस्य तेन तेजसा उपलक्षितेन स्वधाम्नि स्वमहिम्नि प्रतिष्ठित इति श्रुत्युक्तरीत्या स्वप्रतिष्ठत्वरूपे धाम्नि ब्रह्मस्वरूपे रममाणा
य ते तुभ्यं नमो नमोऽस्तु तत्करणं विशिष्टाकारोद्देशेन नमस्कृतः पौनःपुन्येन समासं धिक्कृत्य स्वकीयतेजसोपालक्षिते स्वस्मिन्नेव रममाणस्य^ ननमस्कस्य५
भाव:६ न किंचिदपि वैषम्येण प्रयोजनमिति तादृक्स्यादुमस्य भजतां समभीष्टान् ददतो वैषम्यमिति वक्तुं युक्तं १५ यतएवं विचित्रैश्वर्यवत्त्वे वै य

नमो नमस्तेऽस्त्वृषभाय सात्वतां विदूरकाष्ठाय मुहुः कुयोगिनां निरस्तसाम्यातिशयेन राधसा स्वधा
मनि ब्रह्मणि रंस्यते नमः १५ यत्कीर्तनं यत्स्मरणं यदीक्षणं यद्वंदनं यच्छ्रवणं यदर्हणं लोकस्य स
द्यो विधुनोति कल्मषं तस्मै सुभद्रश्रवसे नमो नमः १६ विचक्षणा यच्चरणोपसादनात्संगं व्युदस्योभ
यतोंऽतरात्मनः विंदंति हि ब्रह्मगतिं गतक्लमास्तस्मै सुभद्रश्रवसे नमो नमः १७ तपस्विनः

स्यं नीतरा यत्कीर्तनस्मरणादेः सम्यक्ताऽरितानि वर्तकत्वमित्याह यत्कीर्तनमिति ईक्षणं मंत्रविग्रहादिनिरीक्षणम् अर्हणं पूजनं यत्कीर्त^
नादिकं कीर्तनादिति यस्य लोकस्य कल्मषं दुरितं विधुनोति सद्यो विनाशयति तस्मै सुभद्रश्रवसे सुभद्रं मंगलं श्रवः कीर्तिः यस्य तस्मै नमः
१६ न केवलं श्रवणादिभिर्दुरितनिवृत्तिरेव कीर्तनादिभिर्विशुद्धेनात्मना परिपूर्णभक्तियोगतो ब्रह्मप्राप्नुवंतीत्याह विचक्षणा इति यच्चरणोपसा
दनात् यच्चरणयोरुपसत्तेः भजनादित्यर्थः तस्मादंतरात्मनः सत्वतः उभयतः इहामुत्र च संगं व्युदस्य गतक्लमाः निवृत्तसांसारिकतापत्रयाः सा७
ब्रह्मगतिं ब्रह्माख्यां गतिं परमं प्राप्यं विंदंति प्राप्नुवंति हीति प्रसिद्धिं द्योतयति ब्रह्मविदाप्नोति परमिति श्रुतिप्रसिद्धां तस्मै सुभद्रश्रव
से नमो नम इत्यर्थः १७

श्री०द्वि० इदानीं भगवान्ते वस्त्ववाचां प्रतिपाद्यः स्यादिति प्रार्थ्यते भूतैरिति सभगवान्मे वचांसि अलंकृषीष्टालंकरोतु प्रतिपाद्यः स्यादित्यर्थः
भा०टी० वाचां भगवत्प्रतिपादनमेव ह्यलंकारः यथोक्तं तद्वाग्विसर्गो जनताघविप्लव इत्यादि ननु भवतो ज्ञानादिनानानाविध प्राप्तानां कथं तत्
१९ वप्रतिपाद्यः स्यादित्यत आह भूतैर्महद्भिर्महदादिपृथिव्यंतैर्भूतैरिमाः पुरः पुराणि शरीराणि निर्माय विभुः स्वयं तत्तज्जीवांतर्यामि स्वभावः अ
मूत्रासु पुरीषु शेते अत एव पुरुषः पुरिशयनात्पुरुषशब्दवाच्यः अवतिष्ठते न केवलं शेते किंतु लीलारसमप्यनुभवतीत्याह षोडशगुणान् श्रो
१११५ त्रादिविषयान् पंच पंच वागादिव्यापारान् पंच प्राणादिवायुवृत्तीः पंच एकं मनस्तोगुणं संकल्पादि एतान् षोडशगुणान् स्वयं षोडशात्मकः दशेन्द्रिय स्मा.
पंचभूतात्मभूतः भुंक्ते लीलारसमनुभवतीत्यर्थः जीवांतर्यामित्वेन गुणान् गृह्णता भगवता गुणग्रहणे लीलारसः जीवस्य तु कर्माधीनमि

19 भूतैर्महद्भिर्य इमाः पुरो विभुर्निर्माय शेते यदमूषु पूरुषः भुंक्ते गुणान् षोडश षोडशात्मकः सोऽलंकृषीष्ट भगवान्वचांसि मे २४ नमस्तस्मै भग
वते वासुदेवाय वेधसे पपुर्ज्ञानमयं सौम्या यन्मुखांबुरुहासवं २५ एतदेवात्मभू राजन्नारदाय विपृच्छते वेदगर्भोऽभ्यधात्साक्षा
द्यदाह हरिरात्मनः २६ इति श्रीमद्भागवते महापुराणे द्वितीयस्कंधे श्रीशुककृतमंगलाचरणवर्णनं नाम चतुर्थोऽध्यायः ४

गहनिभाव: एवं च देवादिनामरूपाणां परमात्मपर्यंतत्वान्नतास्सर्वं वचसां प्रतिपाद्यत्र शास्त्वतीति त्वा येन सद्वचसां सर्वविषयः स्यादिति
दृष्टुक्ता प्रार्थिता २४ एवं भगवंतं नमस्कृत्याथ स्वगुरुं पितरं च व्यासं नमस्करोति व्यासस्यापि वासुदेवावतारत्वाद्वासुदेवायेत्युक्तिः वेधसे सर्वस्रष्ट्रे
सौम्यात्सात्विकाः ज्ञानमयं यन्मुखांबुरुहासवं यन्मुखांभोजे यो मकरंदः तं पपुः तस्मै नम इत्यन्वयः २५ एवं गुरुदेवते नमस्कृत्य प्रकृतमन्वस्य उ
त्तरमवतारयितुं तस्यसांप्रदायिकत्वमवनायनारद हिरण्यगर्भयोः प्रश्नोत्तरे संवादयति एतदिति त्वयायत्पृष्टमेतदेवं तेनारदा
यवेदो यस्य गर्भः अंतःस्थः सवेदगर्भः चतुर्मुखः अभ्यधात् किमित्यत आह हरिर्भगवानात्मने स्वस्मै यदाह भगवांश्चतुर्मुखायाय यदाह रामः
सच नारदायापृच्छते तदेवाह भवते श्रोतुं अभिप्रायः २६ इति श्रीवीरराघवव्याख्यायां द्वितीयस्कंधटीकायां चतुर्थः ४ १९
मि० तुर पृष्ठ ३

सर्वपालकत्वमनुस्मरन्नाह श्रियइति श्रियः लक्ष्म्याः पतिः भर्तेत्यर्थः यज्ञपतिः वैदिककर्ममर्यादापालकः प्रजापतिः ब्रह्मस्तंबपर्यंतप्रजानां पाल
कः धियांध्यानानांपतिः उपासनानांपतिः तिसृणां मर्यादापालकः यज्ञपतिर्धियांपतिरित्याभ्यांद्वयाभिप्रायेणोक्तं लोकपतिः समस्तभुवनानां त
दंतर्गतानांचपालकाभिप्रायेण लोकपतिः प्रजापतिरिति चोक्तं धरापतिः भूर्लोकपाः धरायाः लोकांतर्गतत्वेप्यधर्मबाहुल्यात्पृथक्त्वं क्रिः
रामकृष्णादिरूपेण भूर्लोकेवतीर्य दुष्कृतविनाशं कुर्वन्विशेषेण मर्यादापालक इत्यर्थः अवतारप्रयोजनमाह पतिरिति अंधकादयो या
दवप्रभेदाः तेषामक्रूरोद्धवादीनां पतिर्गतिश्चपालकः प्राप्यश्च पतिर्गतिश्चेत्युभयोपादानेन साधुपरित्राणमेवावतारकृत्यं दुष्कृतवि
नाशनं त्वानुषंगिकमिति सूचितं न केवलं स्वकुलीनानामेव सतां पतिः किंत्वन्येषामपि सतामित्याह सतांपतिः गतिः २

श्रियः पतिर्यज्ञपतिः प्रजापतिर्धियांपतिर्लोकपतिर्धरापतिः पतिर्गतिश्चांधकवृष्णिसात्वतां प्रसीदतां मे भगवान्सतांपतिः २१ य
प्र२ द्ङ्घ्रिनुध्यानसमाधिधौतया धियानुपश्यंतिहितत्वमात्मनः वदंति चैतत्कवयो यथारुचं स मे मुकुंदो भगवान्प्रसीदतां २२ प्रचोदि
ता येन पुरा सरस्वती वितन्वताजस्य सतीं स्मृतिं हृदि स्वलक्षणा प्रादुरभूत्किलास्यतः स मे ऋषीणामृषभः प्रसीदतां २३ राम रामः

इत्यनुषज्यते एवंविधो भगवान्मे मह्यं प्रसीदतु २१ ज्ञानप्रदत्वेनैतां प्र तिज्ञामेव व्यक्तीकुर्वंस्तत्प्रसादं प्रार्थयति यदित्यादिद्वाभ्यां य
नध स्यांघ्रेरभिध्यानमेव समाधिस्तेन धौतया शोधितया धिया आत्मनः तत्वं याथात्म्यं कवयः स्वयं पश्यंति जानंति अन्येभ्यश्च यथारुचं
यथामति स्वस्वप्रतिभावदंति च उपदिशंति चेत्यर्थः स भगवान्मुकुंदो मे मह्यं प्रसीदतां २२ किंच प्रचोदितेति पुराकल्पादौ अ
जस्य ब्रह्मणः हृदि स्मृतिं सृष्टिविषयां स्मृतिं वितन्वता विस्तारयता येन परमात्मना प्रचोदिता संचोदिता सरस्वती त्रयी रूपा
स्वलक्षणा स्वरविशेषादिस्वासाधारणचिन्हवती अस्यतः मुखतः प्रादुरभूत् आविर्भूता वती स प्रचोदयिता ऋषीणां ज्ञा
नप्रदानां ऋषभः श्रेष्ठः मे प्रसीदतां २३

चेतना

श्री·भा· एतदेवोपपादयति नाहमिति अहं त्वस्मिन्कारणाविषये परमुत्कृष्टमवरं निकृष्टं समं मध्यमं देवादि नाम वस्त्वादि रूपं सत्त्वादिगुणैर्भाव्यं सदसदात्म
द्वि·टी· कंचेतनात्मकं किंचिदपि वस्त्वन्यतो न वेद किंतु त्वत्त एव जानामीत्यर्थः यद्वाऽस्मिन्कार्यावस्थे नामरूपाभ्यां सत्त्वादिगुणैश्चोपलक्षितं त्वत्तो निष्पाद्यं
२· चेतनात्मकं किंचिदपि वस्तु इदमनेन सममिदं निकृष्टमिदमुत्कृष्टमिति न जानामीत्यर्थः ६ यत्परत्वमित्यादि प्रश्नः कुतः प्रसङ्ग इत्यत आह सभवानिति
२४ घोरं इति अनुसन्धाय महत्तपः स भवानगात् अभवान् भगवानिति पाठे तेन तदा स्पृहामित्यर्थः अचरदाचरति स्म तद्वान् तेन न तपश्चरणेन
किमस्मादपि परमस्तीति शंकां च यच्छसि तन्न खेदयसि परशंकाप्रदानेन चित्तविक्षेपं जनयसीत्यर्थः ७ प्रश्नमुपसंहरति एतदिति हे सर्वज्ञ स-
कलेश्वर त्वयाऽनुशासितः शिक्षितोऽहं इदं भवतो यदेव मां यथैवानुबुध्ये जानामि तथैव न सर्वं पृच्छतो मम ... इदं विजानीहि विशेषेण ज्ञापय ८

नाहं वेद परं ह्यस्मिन्नापरं न समं विभो नामरूपगुणैर्भाव्यं सदसत्किंचिदन्यतः ६ स भवानचरद्घोरं यत्तपः सुसमाहितः तेन खेदयसे नस्त्वं पर-
२० शंकां च यच्छसि ७ एतन्मे पृच्छतः सर्वं सर्वज्ञ सकलेश्वर विजानीहि यथैवेदमहं बुध्येऽनुशासितः ८ ब्रह्मोवाच सम्यक्कारुणिकस्येदं वत्स ते
विचिकित्सितं यदहं चोदितः सौम्य भगवद्वीर्यदर्शने ९ नानृतं तव तच्चापि यथा मां प्रब्रवीषि भो अविज्ञाय परं मत्त एतावत्त्वं यतो हि मे १० ये-
न स्वरोचिषा विश्वं रोचितं रोचयाम्यहं यथार्कोऽग्निर्यथा सोमो यथर्क्षग्रहतारकाः ११
अथ ब्रह्मा यथा प्रश्नमनुत्तरयिष्यन्तावत्प्रश्नमभिनन्दति
सम्यक् [illegible] गिति हे वत्स पुत्र कारुणिकस्य भवतः ते त्वया इदं सम्यग्विचिकित्सितं ज्ञातुमिष्टं कुत इत्यत आह यद्यस्माद-
हं भगवद्वीर्यदर्शने भगवत्प्रभावज्ञाने यत्नरूपे धर्मे प्रवर्तितः ९ अभिमतार्थजिघृक्षया अनुविचिकित्सितं नानृतमिति भो नारद मां प्रति यथा प्रब्रवी-
षीति अज्ञानहेतुमाह मम एतावत्त्वं [illegible] एकः स्वजनिमतानीत्यादिना यत्त्वदुक्तमितस्त्वापि तव त्वदीयं वचः नानृतमतो वा नासत्यं किंतु मत्तः परं भगवन्त-
न मज्ञात्वा ब्रवीषीति अज्ञाने हेतुमाह मम एतावत्त्वं एतावन्माहिमवत्त्वं यतः परमकारणाद्भवति तं मत्तः परमज्ञात्वा ब्रवीषीत्यर्थः १० तदेव स- रामः
र्वेश्वरस्वरूपं तादात्म्येन नमस्करिष्यन्नाह येनेति अर्कादयो भगवत्तेजसा रोचितं विश्वं तत्तेजोलेशमुपजीव्य स्वयं रोचयन्तीति स्वात्मान- २०
मभिमन्यते एवमहमपीत्यर्थः न तत्र सूर्यो भातीति श्रुतिरत्रानुसंधेया ११

नारदेन विपृच्छते वेदगर्भोऽस्य धात्रादिरुक्तं तत्र नारद उवाच देवदेवेति हे देवेति हे देवदेव देवदेव भूतभावन भूतेश भवः अतएव हे पूर्वज आत्मतत्त्वस्य निवर्त-
नेतितरां प्रकाशकं यज्ज्ञानं तद्विजानीहि अंतर्भावितणिजर्थः विशेषेण ज्ञापयेत्यर्थ १ इदं कार्यं जगद्यद्रूपं यत्स्वरूपं यदात्मकमित्यर्थः अयं निमित्त
प्रश्नः यतः सृष्टं यत उपादानभूतात्सृष्टं यदुपादानकमितियावत् यदधिष्ठानं यत्स्थं यत्परमिति च बहुव्रीहिः यः आधारो यस्य तद्यदधिष्ठानं यदाधा-
रकमित्याधारप्रश्नः यस्मिन् संस्थालयः अस्य तत्र संस्थं अयं लयाधारप्रश्नः यत्परं यत्र सा त्वं तो विलक्षणः त्वत्परं यदधीनमित्यर्थः यच्च यदस्य
स्य हेतुपकरणत्वादिकम स्ति तत्त्वं तस्य तत्त्वं याथात्म्यं तत्त्वतो वेदेत्यर्थः २ नजानासीति न वक्तव्यं इत्याह सर्वमिति यत्सर्वं तदेतत्सर्वं भवाने व
जानाति कुतः यतः त्वं हि भूतभव्यभवत्प्रभुः भूत भविष्यद्वर्तमानकालीनस्य सकलजातस्य प्रभुरन्तर्यामीकः किंच तव त्वया विश्वं जगत् विज्ञाते न भग

नारद उ० देवदेव नमस्तेऽस्तु भूतभावन पूर्वज तद्विजानीहि यज्ज्ञानमात्मतत्त्वनिदर्शनं १ यद्रूपं यदधिष्ठानं यतः सृष्टमिदं प्रभो यत्संस्थं यत्परं यच्च तत्
त्वं वद तत्त्वतः २ सर्वं ह्येतद्भवान्वेद भूतभव्यभवत्प्रभुः करामलकवद्विश्वं विज्ञानावसितं तव ३ यद्विज्ञानो यदाधारो यत्परस्त्वं यदात्मकः
एकः सृजसि भूतानि भूतैरेवात्ममायया ४ आत्मभावयसे तानि न पराभावयन्स्वयं आत्मशक्तिमवष्टभ्य ऊर्णनाभिरिवाक्लमः ५

वस्तु साक्षात् ज्ञानेनावसितं करस्थामलकवत् एवं जगद्विषयः प्रश्नः कृतः ३ आत्मानं वदितुं त्वामेव तं कथयेत्याह यद्विज्ञान इति यस्मिन्नि
षयेत वविज्ञानमस्तीति समानो बहुव्रीहिः यतो विज्ञानं यस्य यद्विज्ञानकं वा विज्ञानदद्गतिर्वा यदाधारः यः आधारो यस्य सः कस्ताव प्रश्नः यः यदात्म
कः यः आत्मा यस्य सः कस्तदात्मेत्यर्थः भवानेव स्वतंत्रः परमेश्वर इति भासितः यः स्रष्टा नन्वन्यस्य प्रेरकः यापर्दृष्टमीत्याह सार्द्धैश्चतुर्भिः एकः सहायः
आत्ममायया आत्मनः संकल्पेन भूतैः पृथिव्यादिभूतैर्भूतानि देवादीनि भूतानि सृजसि त्वमिति शेषः ४ तानि सृष्टानि भूतान्यात्मनात्मनि स्वसि
न्नित्यर्थः स्वयं न पराभावयन् आत्मानं परिभवमप्रापयन् अमोघवांछ इत्यर्थः भावयसे पालयसि ऊर्णनाभिः सूत्रनाभिः कीटविशेषः
यस्तद्वदात्मनः शक्तिं प्रकृतिमवष्टभ्याश्रित्य अक्लमः सृजसि अक्लमः पालयसि संहरसीत्यर्थः ५
तुणतनुगां स्थितिसंहारयोरपि ततः सृजसि

मिचोऽस्य

श्री भा.
द्वि. टी.
२१

एवं सर्वं तदधीनमिति कथयंस्तेन तादृशेनापि त्वमिन्द्रियं शास्योऽस्वतंत्रः स्वयं भवसि न हि किं तो वीत्यपेक्षायामाह तस्येति अखिलात्मनः सर्वांत
र्यामिणः अभिद्रष्टुः सर्वज्ञस्य ईशस्य सर्वस्य वशीकृत्य नियंतुः कूटस्थस्य निर्विकारस्येक्षयैव संकल्पमात्रेण नैवं सृष्टोऽहं तेन चोदितः सृज्यं सृजा अं २
मीत्यन्वयः स तु प्रयोजको हेतुः प्रयोज्य इति भावः १७ ननु कर्तायं नियोजकभावः कृतो वा तस्य सर्वज्ञत्वादयो धर्माः त्वय्यपि तर्हि पुरीतादृश्यपेक्षायां
मायीश्वरस्त्वं मायावश्यस्त्वं जीवभिन्नमित्याह सत्त्वमिति निर्गुणस्य हे विभो गुणरहितस्य कल्याणगुणगणानां समनंतरमेवोक्तत्वात् द्विविधो व्यापकेन भगवता मा
यया प्रकृतिद्वारा स्थितिसर्गनिरोधेषु निमित्तेषु स्थित्यादिसृष्ट्यर्थं सत्त्वादयः प्रयोजयां गृहीताः स्वनियाम्यत्वेन परिगृहीताः सृष्टिस्थितिसंहा
ररूपलीलापरिकरत्वेन सत्त्वादयः ईश्वरेण परिगृहीता इत्यभिप्रायः १८ एवं गुणानामीश्वरलीलापरिकरत्वमुक्त्वा जीवबंधनत्वमाह कार्येति का
र्यं शरीरं कारणमिंद्रियं तानि कर्तृत्वेन निमित्ते पुण्यपापनिष्ठादत्वार्थं गुणाः सत्त्वादयः स्वरूपतो मुक्तं मायिनं मायावश्यं संबधमात्रेण पुरुषं

तस्याभिद्रष्टुरीशस्य कूटस्थस्याखिलात्मनः सृज्यं सृजामि सृष्टोऽहमीक्षयैवाभिचोदितः १७ सत्त्वं रजस्तम इति निर्गुणस्य गुणास्त्रयः स्थितिस
र्गनिरोधेषु गृहीता मायया विभो १८ कार्यकारणकर्तृत्वे द्रव्यज्ञानक्रियाश्रयाः बध्नंति नित्यदा मुक्तं मायिनं पुरुषं गुणाः १९ स एष भ
गवाँल्लिंगैस्त्रिभिरेभिरधोक्षजः स्वलक्षितगतिर्ब्रह्मन् सर्वेषां मम चेश्वरः २० राम० राम० राम० राम०॥

जीवं बध्नंतीत्यन्वयः गुणा निर्गुणाश्रितानिद्रव्यमिति मोहनप्रकाशनप्रवर्तनस्वभावाः द्रव्यशब्दस्य मोहनवाचित्वं पारिशेष्यादवगम्यते अतएवाभिन्क
ध्यायेवकृशः प्रयोगाश्च सत्त्वं रजस्तम इति गुणाः प्रकृतिसंभवाः निबध्नंति महाबाहो देहे देहिनमव्ययं तत्र सत्त्वं निर्मलत्वात्प्रकाशकमनामयं
सुखसंगेन बध्नाति ज्ञानसंगेन चानघ रजो रागात्मकं विद्धि तृष्णासंगसमुद्भवं तन्निबध्नाति कौंतेय कर्मसंगेन देहिनं तमस्त्वज्ञानजं विद्धि मोहनं स
र्वदेहिनां प्रमादालस्यनिद्राभिस्तन्निबध्नाति भारतेति गीतावचनात्स्पष्टमस्मा।रितानि १९ एवं गुणानां जीवबंधकत्वमुक्त्वा मम लीलापरि
करीकृतमायः परमेश्वरः सर्वेषां मम चेश्वर इत्याह स इति लिंगैः सत्त्वादिगुणैः शरीरमस्तत्र कृतैः स्वलक्षितः स्वलक्षितगतिः
स्वलक्षिता स्वगतिर्यस्य तथोक्तः ननु तदा दर्शितपथा नावितिवदन्यदर्शितिमार्गः स्वाधः एवं विधो रूपो हे पन्ना भगवान्हे ब्रह्मन्नारद सर्वेषां मम चेश्वरः इ राम: २०
यंता २०

तस्मै वासुदेवाय नमो धीमहि नमः कुर्महे यद्वा धीमहीत्यत्र मिति शेषः तेन मशब्दस्य पायस भगवतो मायया मां जगद्गुरुं वदन्तीति सम्बन्धः सकला देवा
मनुष्याः पशवश्च यया विमोहिता यादृशं मां यस्मात् वतान् इति यया येन मायया मोहिता मां जगद्गुरुं वदन्तीति न तु तत्त्वविद इत्यर्थः १२ इतरे यामायाया दुर्ज
यत्वं भगवतस्तदसंस्पर्शं चाह विलज्जमानयेति यस्य भगवत ईक्षापथे दृष्टिपथे स्थातुं विलज्जमानया तस्मिन्स्वकार्यं कुर्वत्या अमुया मायया विमो
हिताः सन्तो ममाहमिति दुर्धियः विकत्थन्ते १३ विकत्थनमेवाह द्रव्यमिति द्रव्यं पृथिव्यादि भूतमेव कारणमिति केचित् कर्मैव कारणमिति
केचित् कालमित्यन्ये स्वभाव इत्यपरे कर्माधीनत्वाज्जीव एव कारणमित्यपरे एवं यन्मायया मोहिता विकत्थन्त इत्यर्थः एवं वै स्वतन्त्रतयाभि
५६ मताः पदार्थाः भगवदधीनाद् इत्याह वासुदेवादिति हे ब्रह्मन् द्रव्यादि अर्थः वासुदेवात्परो अन्यो अर्थो नास्ति यथा वासुदेवात्परो नास्ति तथा तद

तस्मै नमो भगवते वासुदेवाय धीमहि यन्मायया दुर्जयया मां वदन्ति जगद्गुरुं १२ विलज्जमानया यस्य स्थातुमीक्षापथेऽमुया विमोहिता विकत्थन्ते
ममाहमिति दुर्धियः १३ द्रव्यं कर्म च कालश्च स्वभावो जीव एव च वासुदेवात्परो ब्रह्मन्न चान्योर्थोस्ति तत्त्वतः १४ नारायणपरा वेदा देवा ना
रा रायणाङ्गजाः नारायणपरा लोका नारायणपरा मखाः १५ नारायणपरो योगो नारायणपरं तपः नारायणपरं ज्ञानं नारायणपरा गतिः १६ रामराम रामः

त्मकमतत्परतंत्रं च नास्तीत्युक्तं वक्ष्यमाणे श्लोके सूचितं १४ एतदेवोपपादयति नारायणपरा इति वेदा नारायणः परं कारणं येषां ते तथोक्ता
स्य वा ए तस्य महतो भूतस्य निःश्वसितमेतदृग्वेद इत्यादि श्रुतेः यद्वा नारायणः परं प्रतिपाद्यो येषां ते तथोक्ताः सर्वे वेदा यत्पदमामनन्तीति श्रु
गा॰२ तेः देवा इन्द्रादयः नारायणस्याङ्गाज्जातः इन्द्रो मुखात् इन्द्रश्चाग्निश्चेत्यपि विवक्षितं चन्द्रमा मनसो जातः चक्षोः सूर्यो अजायत इत्यादि श्रुतेः लोकाः नारायणः प
रः स्वामी येषां ते तथोक्ताः मखाः क्रतवः नारायणपराः नारायणः परः आराध्यो येषां ते तथोक्ताः १५ योगो विवेकादिजन्यः उपासनात्मको योगो
नारायणपरः नारायणः परो ध्येयो यस्य स तथोक्तः तपः विप्रयोगमन्तर्गतं कर्म नारायणपरं नारायणः परं फलं यस्य तत्तथोक्तं ज्ञानं शास्त्रज
न्यं ज्ञानं योगस्य पूर्वमुक्तं तदपि नारायणपरं नारायणः परो ध्येयो यस्य तत्तथोक्तं गतिर्योगफलमर्चिरादिका सापि नारायणः परा गतिर्यस्याः
सा तथोक्ता १६

श्री·भा· तेजोऽवति निरूपणस्वभावान्नाहं द्रव्यशक्तिरिति अनित्नेत्रयाणां स्वभावप्रदर्शनं द्रव्यशक्तिः विभुर्महाभूतान्युत्पादने
द्विती· शक्तिः सामर्थ्यं यस्य स तथोक्तः सात्विकाहंकारानुग्राहकत्वं प्रयाक्रियातस्या शक्तिर्यस्य स तथोक्तः प्रवर्त्तनमेव हि रजः कार्यं ज्ञानशक्तिः श
२२ ब्दादिविषयज्ञानसाधनेंद्रियोत्पादने शक्तिर्यस्य स तथोक्तः एकादशानामिंद्रियाणां सात्विकाहंकारकार्यत्वाद्रजसस्तु तदनुग्राहकत्वात् २४ २२

६४ एवमहंकारस्य त्रैविध्यमुक्त्वा तामसाहंकाराच्छब्दादितन्मात्रक्रमेणाकाशादिसृष्टिमाह तामसादिति भूतादिरिति तामसाहंका
रस्यैव नामांतरं विक्रियमाणाद्भूतादिनामकात्तामसाहंकारान्नभः अभूत् शब्दद्वारा नभः उदपद्यतेत्यर्थः एवमेव स्पर्शादिद्वारा वाय्वादयः ३२
एतदेव शब्दस्वभावं कथयन्नुपपादयति लिंगमिति तस्य नभसो मात्रा सूक्ष्मरूपं गुणो यो वर्णकोऽसाधारणो धर्मस्त्रयः शब्दः सोऽप्यभू
३२ दित्यर्थः यद्वा तस्य नभसः मात्रा गुणः असाधारणगुणः शब्दस्य लक्षणं द्रष्टृदृश्ययोरात्मानात्मनोर्लिंगं प्रमाणं यस्स शब्द इत्यर्थः श

ज्ञानशक्तिः द्रव्यशक्तिः क्रियाशक्तिरिति प्रभो २४ तामसादपि भूतादेर्विकुर्वाणादभून्नभः तस्य मात्रा गुणः शब्दो लिंगं यद्द्रष्टृदृश्ययोः २५ नभसो
थ विकुर्वाणादभूत्स्पर्शगुणोऽनिलः परान्वयाच्छब्दवांश्च प्राण ओजः सहो बलं २६ वायोरपि विकुर्वाणात्कालकर्मस्वभावतः उ
दपद्यत तेजो वै रूपवत्स्पर्शशब्दवत् २७ तेजसस्तु विकुर्वाणादासीदंभो रसात्मकं रूपवत्स्पर्शवच्चांभो घोषवच्च परान्वयात् २८ ॥

ब्दो हि शास्त्रात्मना आत्मानात्मनोः प्रमाणं यदाह सूत्रकारः शास्त्रयोनित्वादिति यदिति नपुंसकत्वं लिंगापेक्षया २५ विकुर्वाणा
द्रूपांतरं गच्छतः नभसः स्पर्शगुणोऽनिलो वायुरभूत् स्पर्शतन्मात्रद्वाराभूदित्यर्थः परान्वयात्कारणनभोनुवृत्तेः शब्दवांश्च वायुरि
त्यर्थः सस्पर्शस्य वायोर्लक्षणमाह प्राणश्चेष्टाविशेषायपन्नो वायुर्हि प्राणः ओजः सहो बलमिति धर्मप्रधानो निर्देशः ओजआदिवि
शिष्ट इत्यर्थः ओजः प्रवृत्तिशक्तिः सहो वेगं बलं धारणसामर्थ्यं ओजः सहो बलानींद्रियमनः शरीराणां पाटवानि तेषां हेतुरिति किंचित् नर
२६ कालकर्मस्वभावतो हेतोर्विकुर्वाणाद्वायो रूपवत् कारणभूताकाशवायुगुणानुवृत्तेः स्पर्शशब्दवच्च तेज उदपद्यत कालकर्मस्वभाव रामः
तद्यतिसर्वत्रानुसंधेयं २७ विक्रियमाणात्तेजसः रसात्मकं परान्वयाद्रूपस्पर्शशब्दवच्चांभ आसीत् घोषवच्छब्दवत् २८ २२

एवमेकः स्वतन्त्रो भगवानेवेति प्रश्नस्योत्तरमुक्त्वा यद्रूपमित्यादि प्रश्नस्योत्तरं वक्तुं सृष्टिप्रकारमाह कालमिति मायेशो मायाधिपतिः स्वया मा
ने२ यया स्वसंकल्पेन आत्मन् तया प्रकृत्या विबुभूषुः प्रकृतिद्वारा नाना नामरूपभावं वितुमिच्छुर्यदृच्छया प्राप्तं हेतुकमपरप्रेर्यं कर्मपरवशः आत्मन्या
त्मनि प्राप्तं संगतं युक्तं कालं कर्म स्वभावं चोपादद्दे कालो गुणानां क्षोभकः पचनात् सोमहेतुः कर्म जीवादृष्टं स्वभावः प्रकृतेः परिणामस्वभावः एते वा
मुपादानं नामस्वस्वकार्योन्मुखत्वापादनं २१ कालकर्मस्वभावोपादानफलं दर्शयन्न सृष्टिमाह कालादिति कालात्केतुभूताद्गुणव्य
तिकरात्कालकृतगुणवैषम्यादित्यर्थः परिणामस्वभावतः प्रकृतेः परिणामस्वभावात् कर्मणो जीवादृष्टाद्धेतोः परमपुरुषाधिष्ठि
तादव्यक्तान्महतो महत्तत्त्वस्य जन्मोत्पत्तिरभूदित्यर्थः तदधिष्ठितं तदाहितस्वकार्यजननसामर्थ्यवत्त्वं अव्यक्तादित्यध्याहारः पुरुषाधिष्ठित
कालं कर्म स्वभावं च मायेशो मायया स्वया आत्मन् यदृच्छया प्राप्तं विबुभूषुरुपाददे २१ कालाद्गुणव्यतिकरः परिणामः स्वभाव
वतः कर्मणो जन्म महतः पुरुषाधिष्ठितादभूत् २२ महतस्तु विकुर्वाणाद्रजःसत्त्वोपबृंहितात् तमःप्रधानस्त्वभवद्द्रव्य
ज्ञानक्रियात्मकः २३ सोऽहंकार इति प्रोक्तो विकुर्वन्समभूत्त्रिधा वैकारिकस्तैजसश्च तामसश्चेति यद्भिदा २४ राम २ रामः
त्वाद्व्यक्तानुग्रहेणोच्येतिदर्शनात् व्यतिकरः मिश्राणां समानां गुणानां विषमत्वापत्तिः यत्र गुणानां व्यतिकरो यस्मिन्निति बहुव्रीहिः अव्य
क्तादित्यर्थः २२ महतोऽहंकारोत्पत्तिमाह महतस्त्विति विक्रियमाणाद्रजःसत्त्वोपबृंहितान्महतः द्रव्यज्ञानक्रियात्मकः मोहनप्रकाश
नप्रवर्तनस्वभावं तमः प्रधानः तमोगुणप्रधानः अभवत् महतस्त्रिगुणात्मकत्वेऽपि क्रियाशक्तिप्रधानत्वाद्रजःसत्त्वोपबृंहितादि
त्युक्तं एवमहंकारस्य तमःकार्यप्रधानत्वात्तमःप्रधानइत्युक्तिः अत एवाहंकारकार्येषु तामसं बहु राजसं सात्त्विकं चाल्प
मेवमहत्कार्येषु तामसमल्पं तदितरद्भूयं बहु वर्धितमिति तत्त्वं २३ तमःप्रधानस्य किं नाम धेयमित्यत आह स इति तस्य
त्रैविध्यमाह विकुर्वन्नूपांतरं गच्छन्नहंकारस्त्रिधा समभूत्सम्यगभूत् यद्भिदा यस्याहंकारस्य भिदा वैकारिकस्तैजसस्तामस
श्चेति सात्त्विकराजसतामसाहंकाराणां क्रमेण भाति २४

ज्ञानशक्तिः इति प्राणश्च इंद्रियपरं ज्ञानशक्तिः प्राणः ज्ञानेंद्रियगणाः क्रियाशक्तिश्च प्राणः कर्मेंद्रियगणाः बुद्धिरहंकारश्चाचतुष्टयेत्येतौ तैजसः राज
श्रीभि. साहंकारान्वितत्वात् सामग्री प्रसक्तं ज्ञानकर्मेंद्रियाणां अतः करणमात्रस्य कार्यमेव तिनत्वात्तत्कारणेनाधिजो गुणान्वितेन [illegible] भवितव्यमित्यनन्तरान्तर्य
टि.टी: कर्त्वात्तैजसत्वं वादस्य सर्वेंद्रियाणां गतसाहंकारानुगृहीतमस्ति ज्ञाहंकारकार्यत्वमेवेतितन्यहो [illegible] पदितेोधस्त्यर्थः एवंभूतादेरपींद्रिय सत्त्वाव ६२
२३ नुग्रहकर्तृत्वसाद्वृत्तिवेदितव्यं इंद्रियाणीति [illegible] गणपति श्रोत्रमिति दोः पाणिः मेढ्रं [illegible] स्थः क्रमहत्त्वतनविवेष्टितः ३२ य दैति यदैते भूतानींद्रि १४
याणि मनश्च तेषां गुणाः तन्मात्राणि विषयाः शब्दादयस्ते सर्वे संहताः मिलिताः आयतनस्यैव यदायतनस्य ब्रह्मांडस्य भगवच्छरीरस्य निर्माणे
देहस्यावि निर्माणे न शेकुर्नाशक्नुवन् ३३ तदा भगवच्छक्त्या चोदिता संहत्य पंचीकरणेन अन्यकारेण परस्परं मिलित्वा सदसत्त्वं सत्त्व पंचीकरणे [illegible]
त्वे सत्त्वं [illegible] भयमन्नं भयप्र[illegible] काल कर्म स्वभावात्मउपादायादः ब्रह्मांडं ससृजुः यद्वा अनुभयामित्यदः शाद्धनिर्दिष्ट ब्रह्मांडं विमर्ग

ज्ञानशक्तिः क्रियाशक्तिर्बुद्धिप्राणश्च तैजसौ श्रोत्रं त्वग्घ्राणदृग्जिह्वा वाग्दोर्मेढ्रांघ्रिपायवः ३२ यदैते संगता भावा भूतेंद्रियमनोगुणाः यदायत
ननिर्माणे न शेकुर्ब्रह्मवित्तम ३३ तदा संहत्य चान्योन्यं भगवच्छक्तिचोदिताः सदसत्त्वमुपादाय चोभयं ससृजुर्ह्यदः ३४ वर्षपूगसहस्रांते तत्
दंडमुदके शयं कालकर्मस्वभावस्थो जीवोऽजीवमजीवयत् ३५

अनुभयं कार्यकारणभावानन्वितमंडं ब्रह्मांडं ससृजुरित्यर्थः कार्यमयं डं
ह्याकाशकार्यं वायुवत्तत्त्वांतरं न च तत्त्वांतरारंभकं सतत्त्वांतरतया कार्यं तत्त्वांतरादेतया कारणं च न भवतीत्यनुभयं ब्रह्मांडमुक्तं अत्र
चतुर्मुखोत्पत्त्यादिकमन्यत्र विस्तरेण वक्ष्यमाणमत्राप्यर्थसिद्धमनुसंधेयं ३४ वर्षपूगसहस्रांते प्रलयकालावसाने इत्यर्थः अन्यथा तत्क्ष
णेनैव हृतत्त्व जलबुद्बुदवत् समसिति विरोधात् जीवः देवाद्यपेक्षया समष्टिपुरुषवत् [illegible] जीवशरीरकः परमपुरुषः कालकर्म
स्वभावाश्रितः सन् जीवमचेतनमुदके शयमंडं ब्रह्मांडमजीवयच्चेतयतिस्म अत्रोदके शयमित्यनेनांडस्यैव पूर्वांगमोद
कालेन कारण[illegible] सर्वस्मिन्नानुसंधेया परोलानि [illegible] चतुर्दशांतरस्था स्याभिप्रायः ३५ राम: २३

अथ विकुर्वाणादंभसो गंधवान्परान्वयाच्छब्दस्पर्शरूपगुणान्वितश्च विशेषः पृथिव्यभूत् २९ सर्वेषामिंद्रियाणां सात्विकाहंकारादुत्पत्तिमाह वै-
कारिकादिति वैकारिकतामसः सात्विकाहंकाराद्गुणादयः श्रोत्राद्यधिष्ठानदेवताः ताभिरधिष्ठितानींद्रियाणि मनश्च जज्ञिरे इत्यर्थः अग्निर्वा-
ग्भूत्वेत्यादिश्रुतेः अधिष्ठात्रधिष्ठेययोरभेदोपचारात्तासामानाधिकरण्याद्वा वैकारिका इत्युक्तं एवं नामगणा इति दिग्वातार्कप्रचेतोऽश्वि-
नौ चैते पंच श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणानामधिष्ठातारः वह्नीन्द्रोपेन्द्रमित्रब्रह्मप्रजापतिः एते पंच वाक्पाणिपादपायूपस्थानामधिष्ठाता-
रः मनसश्चाधिष्ठाता चंद्रमाः एभिर्दशभिरधिष्ठितानि श्रोत्रादीनि ज्ञानानीत्यभिप्रायः ३० तैजसाहंकारकार्यमाह तैजसात्तैजससंबंधितः रा-
जसाहंकारादनुगृहीतानि सात्विकाहंकारादित्यर्थः अन्यथा पूर्वग्रंथव्याघातात् पूर्वग्रंथेऽभिमानिदेवतासृष्टिरिति चेत्त्रं इंद्रियैर्विना देवतादेहारं-
भासंभवादनुमुखत्वेन सत्वेन तत्त्वकल्पमानेनादित्यचंद्रादीनामंशत्वेऽपि प्राकृतसंयोगाच्च न चासत्त्वानामेवाधिष्ठानत्वमप्यनुपपन्नमिति वा

विशेषस्तु विकुर्वाणादंभसो गंधवानभूत् परान्वयाच्छब्दस्पर्शरूपगुणान्वितः २९ वैकारिकान्मनो जज्ञे देवा वैकारि-
कादश दिग्वातार्कप्रचेतोऽश्विवह्नीन्द्रोपेन्द्रमित्रकाः ३० तैजसात्तु विकुर्वाणादिंद्रियाणि दशाभवन् ३१ रामराम

च्ये परमात्मा कायस्थानां भगवद्विकल्पानुगृहीतानामधिष्ठातृत्वात्तदेवाह कोऽयं परमात्मा इति चेद्वैकुंठस्थो लोके अत एव वक्तं च तुः षोडशापंचकश-
क्तिभिरिति वक्ष्यते न च परमात्मा कायस्थाभिरेवाधिष्ठानोपपत्तेः अनुमुखकर्तृकाद्विजादिसृष्टिर्व्यर्थेति वाच्यं व्यष्टीन्द्रियाधिष्ठाना-
पेंद्रियादिसृष्टेरावश्यकत्वात् अतः परमात्मा कायस्थत्वेन तत्त्वगतत्वं अत एवैभिरधिष्ठानभिः परमात्मानं प्रतिक्रियमाणस्तुतिरप्युप-
पद्यते अन्यथांशोत्पन्नांतरं अवत्यमानानामेषामंशोत्पत्तेः पूर्वमभावात्तत्कर्तृकास्तुतिरनुपपन्ना स्यात् ननु तेषां सर्वेंद्रियाधिष्ठातृत्वेन तदिंद्रियाणां
केऽधिष्ठातार इति चेदुच्यते तदिंद्रियाणामपि दशानामधिष्ठातारः संत्येव कैकमिंद्रियं त्वधिष्ठातृनमन्यमवतिष्ठते तत्र तत्र परतिर्वादिकात्व-
न्याधीनत्वेनैव वा परमात्मना वाधिष्ठीयंते इति नानवस्थाप्रसंगः इति यथा तैजसात्विति पद्यांतरोक्तिः ३१ एतद्व्ययं विशेषमाह ८० राम

तपापि २ नो चेदनवस्थाप्रसंग इति चेत्

श्री·द्वि· इदानीं पौरुषं लोकत्रयकल्पनामाह भूर्लोकः कल्पित इति पादतलमारभ्य नाभितः भूर्लोकः नाभिमारभ्य ऊर्ध्वतः भुवर्लोकः कल्पितः अन्तरा
भा·टी· हीनां भूतादिषु तदन्तर्भावो ४२ इति द्वितीये पंचमः ५ एवं कृत्स्नप्रपंचस्य महदादिक्रमेण अस्यैव राजविभूतित्वमभिधाय तद्देवपुरुषस्य के
२५ मि१ संवादेन दृढीकुर्वन्स्वरूपमित्याह वाचामिति वागिन्द्रियस्य तदधिष्ठातृदेवतानां भूतानामपि भगवन्मुखं स्थानं वमास्पदं गायत्र्युष्णिगनुष्टु
बृहतीपंक्तिजगतीत्रिष्टु... आनन्दानां छंदसां सप्त धातवः त्वगादि सप्त धातुस्थानीयाः भगवद्विग्रहावयवाः स्थानं हव्यदेवानामन्नं क
व्यपितॄणाममृतं तदुभयशेषमनुष्याणां एषामन्नानां सर्वरसस्य मधुरादेः षड्विधस्य च कारणस्य आदिरसनेन्द्रियस्य तदधिष्ठातृवरुणस्य च तस्य
जिह्वा क्षेत्रं एवं सर्वत्रानुक्रमयुक्तेयं १ सर्वासूनामसुप्राणादिप्राणानां वायोश्च तस्य नासे नासारंध्रे परमायने उत्तमे क्षेत्रे अश्विनोरोषधीनामपि तयोर्मोदप्र

२५ भूर्लोकः कल्पितः पद्भ्यां भुवर्लोकोऽस्य नाभितः स्वर्लोकः कल्पितो मूर्ध्ना इति वा लोककल्पना ४२ इति श्रीभा० द्वितीयस्कंधे पंचमोऽध्यायः
५ ब्रह्मोवाच वाचां वह्नेर्मुखं क्षेत्रं छंदसां सप्त धातवः हव्यकव्यामृतान्नानां जिह्वा सर्वरसस्य च १ सर्वासूनां च वायोश्च तन्नासे परमायने अश्विनोरोष
धीनां च घ्राणो मोदप्रमोदयोः २ रूपाणां तेजसां चक्षुर्दिवः सूर्यस्य चाक्षिणी कर्णौ दिशां च तीर्थानां श्रोत्रमाकाशशब्दयोः ३ तद्गात्रं वस्तुसा
राणां सौभगस्य च भाजनं त्वगस्य स्पर्शवायोश्च सर्वमेधस्य चैव हि ४ रोमाण्युद्भिज्जजातीनां यैर्वा यज्ञस्तु संभृतः केशश्मश्रुनखान्यस्य शिलालोहाभ्रविद्युतां ५

दयोश्च नासा घ्राणेन्द्रियं स्थानं मोदस्त्वनुकूलवस्तुदर्शनजं सुखविशेषः प्रमोदस्त्वनुकूलवस्तुनः स्वीयत्वबुद्धिजं सुखविशेष इति भेदः २ रूपाणां रूपादीनां तेज
सां रूपप्रकाशकानां च चक्षुः तच्चक्षुरिन्द्रियं स्थानं दिवः सूर्यस्य चाक्षिणी तद्गोलकौ स्थानं सर्वत्र षष्ठ्यन्तनिर्दिष्टानां प्रथमान्तनिर्दिष्टं क्षेत्रं द्रष्टव्यं दिशां तीर्था
नां तत्कर्णौ कर्णबिले स्थानमाकाशशब्दयोः श्रोत्रं ३ वस्तूनां प्रेमास्पदानां सारो भागः सौन्दर्यं यत्तद्यागश्च तत्पात्रं तच्छरीरं भाजनं स्थानं स्पर्शवायोः सर्वमेधस्य
सर्वस्य यज्ञस्य च त्वक् स्थानं ४ उद्भिज्जजातीनां सर्ववृक्षाणां यैर्वृक्षैः यज्ञः संभृतः साधितः तेषामेव तद्रोमाणि स्थानं शिलालोहाभ्रविद्युतामस्य केशश्म राम:
श्रुनखानि स्थानं तत्र शिला लोह स्थानमभ्रविद्युतोः केशश्मश्रूणीति विवेकः क्षेमकर्माणां रक्षाकारिणां लोकपालानामिन्द्रादीनां तद्बाहवः स्थानं ५ २५

स्प३

स एव पुरुषश्चतुर्मुखस्वरूपेणोपस्थितः परमपुरुषः अण्डं निर्भिद्य तस्मान्निर्गतः अण्डभेदनावकाशलाभादनुपलद्धसंचारादिमानभूदित्यर्थः चतुर्मुख
स्य भगवद्रूपत्वसामानाधिकरण्येनाह सहस्रेति यश्चतुर्मुखशरीरकत्वेनावस्थितः स एव सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् सर्वतः पाणि
पादं तत्सर्वतोऽक्षिशिरोमुखं सर्वतः श्रुतिमल्लोके इत्यादिनोक्तं सर्वतः पाणिपादादिकार्यकर्ता परमपुरुष इत्यर्थः ३६ यस्य सर्वतः पाणिपादादि
कार्यकर्तुर्विराट्पुरुषस्यावयवैः पादतलाद्यवयवैर्लोकान् पातालादीन्मनीषिण उपासकाः कल्पयन्ति लोकान् यदवयवत्वेन रचयन्ती
त्यर्थः तत्र देवयवश्रम बानां तत्तद..वयवत्वेनोपासने युक्तं तदवयवैर्लोकरचनामाह कट्यादिभिरिति कटिरूपावयवोः यस्मा

स एष पुरुषस्तस्मादण्डं निर्भिद्य निर्गतः सहस्रोर्वङ्घ्रिबाह्वक्षः सहस्राननशीर्षवान् ३६ यस्येहावयवैर्लोकान्कल्पयन्ति मनी
षिणः कट्यादिभिरधः सप्त सप्तोर्ध्वं जघनादिभिः ३७ पुरुषस्य मुखं ब्रह्म क्षत्रमेतस्य बाहवः ऊर्वोर्वैश्यो भगवतः पद्भ्यां स्म शूद्रोऽभ्य
जायत ३८ भूर्लोकः कल्पितः पद्भ्यां भुवर्लोकोऽस्य नाभितः हृदा स्वर्लोक उरसा महर्लोको महात्मनः ३९ ग्रीवायां जनलोकोऽ
स्य तपोलोकः स्तनद्वयात् मूर्धभिः सत्यलोकस्तु ब्रह्मलोकः सनातनः ४० तत्कट्यां चातलं क्लृप्तमूरुभ्यां वितलं विभोः जानुभ्यां
सुतलं शुद्धं जंघाभ्यां तु रसातले ४१ महातलं तु गुल्फाभ्यां प्रपदाभ्यां रसातलं पातालं पादतलत इति लोकमयः पुमान् ४२

द्भागः जघने पुरोभागः सप्त लोकानतलादीन् ऊर्ध्वमेरादीन् सप्त कल्पयन्तीत्यन्वयः ३७ वर्णानां तद्विभूतित्वाय चतुर्मुखरूपेणावस्थितात्तत
उत्पत्तिं दर्शयति पुरुषस्येति ब्राह्मणाः मुखमिति कारणयोरभेदविवक्षयोक्तं बाहव इति च तत्र क्षत्रियः ३८ इदानीमुपास
नार्थं लोककल्पनाभेदं दर्शयन् ऊर्ध्वलोकपक्षमाह चतुर्दशभिः भूर्लोकः पातालमारभ्य पद्भ्यां कटिपर्यन्ताभ्यां कल्पितः भुवर्लोकः ना
भितः नाभिमारभ्य स्तनद्वयात् हृदयं कमलाकारं तदूर्ध्वभागः उरः ब्रह्मलोकः सनातन इति सत्यलोकविशेषणं सनातनत्वं च भरा
द्यपेक्षया यद्वा ब्रह्मलोको वैकुण्ठाख्यलोकः सनातनः नत्यस्त्र पञ्चान्तर्वर्तीत्यर्थः ३९ ४० ४१ ४२ राम राम रामः

कार्यं नमः पद्मं तद्वैकुंठ गति द्वादशो सर्वोपरि वर्त्यात यत्र स्थानी
यत्वे नित्यात्

श्रीभा॰
द्वि॰टी॰
२५

विद्याध्र विद्याधराः जलेक्षु त्रैनमस्त्रीकोशिष्यानानि येऽस्मात्ते जलक्ष्य:स्तनमौकस इति संधिरार्षः १४ ग्रहाः मर्यादयः केतवः शिनक्ष
त्राणितारास्तथैव नभस्तले च रूपेणैव भिन्नानि इतः विद्युतः स्तनयित्नवो मेघाः गर्जितानि वा किं बहुना यत्त्रिकालत्रयवर्त्तिवस्तु जातं तदिदं सर्वं पुरुष
त्रिकालत्रयवर्त्तिहृश्यावस्तु जातं शरीरं कृत्वा हृष्टपुरुषशरीरं तं तत्र तत्र वस्तुनाऽनित्यत्वार्थः नामरूपविभागान्नकोऽतिव्यक्तं बहिरन्तिपुरुषकालत्र
शरीरकस्य परमपुरुषस्यैव विभक्तानामरूपश्रक्रतिपुरुषशरीरकः परमात्मा अकजगत्कारणं वस्थानादयमेवोपदेशत्रयमत्रः सर्वे अवेदाः
तेषां वमेव पुरुषे कं सर्वं खल्विदं ब्रह्म तस्य यस्मात्सा ब्रह्मतत्त्वमसी त्यादिभिरपदिश्यते १५ पुरुषस्यैवेदमिति तामानाधिकरण्यस्य व्याप्तिं
वंधनत्वमाह तेनेति अंगुष्ठो निष्कावितस्तं तेनाभ्यामृपरितिष्ठति हृदयं तद्विजानीयाद्विश्वस्यायतनं महदिति श्रुत्युक्ताद्विशान्यस्याऽप
रिवितादि परिच्छिन्नप्रदेशान्ते स्थितं हृदयमधितिष्ठ तातेनपरमात्मनेदं विश्वमावर्तं व्याप्तं अतोहृदयान्तर्वर्त्ती प्राणः परमात्मात्मधिष्ठत्वात्
पशवः पितरः सिद्धा विद्याध्रश्चारणा द्रुमाः अन्ये च विविधा जीवा जलस्थलनभौकसः १४ ग्रहर्क्षकेतवस्तारास्तडितः स्तनयित्नवः सर्वं पुरुष
वेदं भूतं भव्यं भवच्चयत् १५ तेनेदमावृतं विश्वं वितस्तिमधितिष्ठति स्वधिष्ण्यं प्रतपन् प्राणो वहिश्च प्रतपत्यसौ १६ एवं विराजं प्रतपंस्तपत्य
न्तर्बहिः पुमान् सोऽमृतस्याभयस्येशो मर्त्यमन्नं यदत्यगात् १७
स्वध्यानं शरीरं प्रतपन्नं तर्व्याप्त्या प्रशासनाधीनं न कुर्वन् बहिश्च स्वं ... वहिर्विम स्था।
पिवस्तु जातं प्रशासनाधीनं यथा करोति १६ एवं विराजं विराट्शब्दवाच्यानितं कार्यप्रपंचं प्रशासनाधीनां कुर्वन्नंतर्बहिश्च प्रशासनाधीनक
पतीत्यर्थः अत्र कार्यकारणोपचाराद्विराट्शब्दः अतोऽपरः एतेनापरिच्छिन्नत्वप्रतिपादकं सभूमिं विश्वतो वृत्वेत्यर्द्धं व्याख्यातं भवति सप
रमात्मा भूमिं ब्रह्माण्डरूपं प्रपंचं विश्वतः सर्वतः स्वतयाप्यमिदशांगुलमात्रमतिक्रम्य स्थितः अत्यतिष्ठद्दशांगुलमित्याधिक्यमात्रं विवक्षि
तं न प्रमाणं अनुपयोगात्परिच्छिन्नत्वाच्चेतितस्यार्थः जीवान्तरात्मत्वेन वसतोऽपि परस्याभोक्तृत्वमोक्षप्रदत्वं च प्रतिपादयन् उतामृतत्वस्येत्यस्या
र्थमाह सइति नविद्यते भयं यस्मात्तस्यामृतस्य मोक्षस्येशो प्रदाता यद्यस्मात्मर्त्यं अनित्यमन्नं भोग्यं कर्मफलमत्यगादतिक्रम्य स्थितः अ राम:
अनश्नन्नन्योऽभिचाकशीतिश्रुत्युक्तरीत्या संभावितफलसंबंधत्वात्परमात्मा मोक्षद इत्यर्थः अतावानेनेति व्याख्येयं द्वितीयार्द्धं तत्तीया १७ २५

सर्वे वः स्व रिति षष्ठी बहुवचनान्तं सुरादीनां त्रयाणां लोकानां विक्रमस्तस्य त्रिविधपादविन्यासः स्थानं क्षेमस्य त्राणस्य शरणस्य स्थानानि वृत्तिः
वारणस्य सर्वेषां कामानां वरस्य श्रेयसोऽपि हरेश्चरणावाह्वाश्रयः ६ अपां वीर्यस्य सर्गस्य सर्गस्य रेतः पर्जन्यस्य प्रजापतेश्च पुंसो भगवतः शिश्न
उपस्थेन्द्रियाधिष्ठानमास्पदमित्यर्थः प्रजात्यानंदः संतानार्थसंभोगजो नयानिर्वृतिस्तापनिवृत्तिस्तस्यास्तदुपस्थेन्द्रियमाश्रयः ७ यमस्य मित्रस्य
परिमोक्षस्य मलत्यागस्य च तस्य पाय्विन्द्रियमाश्रयः ८ हिंसादीनां तद्गुदः आश्रयः पायुरिन्द्रियं गुदमधिष्ठानं पराभूतेरलक्ष्म्याः अधर्मस्य तम
सश्चाज्ञानस्यापि पश्चिमः तत्पृष्ठभाग आश्रयः ९ नदनदीनां तन्नाड्यः स्थानं गोत्राणां गिरीणां तदस्थिसंघः स्थानं अव्यक्तं प्रधानं रसोऽन्नादि

बाहवो लोकपालानां प्रायशः क्षेमकर्मणां विक्रमो भूर्भुवः स्वश्च क्षेमस्य शरणस्य च ६ सर्वकामवरस्यापि हरेश्चरण आस्पदं अपां वीर्य
स्य सर्गस्य पर्जन्यस्य प्रजापतेः ७ पुंसः शिश्न उपस्थस्तु प्रजात्यानंदनिर्वृतेः पायुर्यमस्य मित्रस्य परिमोक्षस्य नारद ८ हिंसाया निरृतेर्मृत्यो
र्निरयस्य गुदः स्मृतः पराभूतेरधर्मस्य तमसश्चापि पश्चिमः ९ नाड्यो नदनदीनां तु गोत्राणामस्थिसंहतिः अव्यक्तरससिंधूनां भूतानां निधन
स्य च १० उदरं विदितं पुंसो हृदयं मनसः पदं धर्मस्य मम तुभ्यं च कुमाराणां भवस्य च ११ विज्ञानस्य च सत्त्वस्य परमात्मा परायणं अहं भवा
न्भवश्चैव य इमे मुनयोऽग्रजाः १२ सुरासुरनरा नागाः खगा मृगसरीसृपाः गंधर्वाप्सरसो यक्षा रक्षोभूतगणोरगाः १३

रसः सिंधवः समुद्राः तेषां भूतानां निधनस्य लयस्य च तदुदरं स्थानं विदितं १० मनसः सर्वदेहिमनस्तत्त्वस्य पुंस ईश्वरस्य हृदयं तत्पदं स्था
नं धर्मस्य मम च तुभ्यं च चतुर्णां सनत्कुमाराणां सनकादीनां भवस्य रुद्रस्य ११ विज्ञानस्य च तत्त्वस्य महत्तत्त्वस्य भगवत आत्मातः परा
यणं आश्रयः स्थानं एवं परमात्मनो जातं कृत्स्नं जगद्विभूतिभूतं तच्छरीरत्वेन तत्तेनात्मविविक्तमित्युक्तेनात्तदेवप्रपञ्चसत्कार्यत्वकथनेन
प्रथयति तत्र महत्तत्त्वशरीरं स्वर्देवस्य ब्राह्मणोऽस्य मुखमासीदित्यादेरर्थः पूर्वाध्याये कथितः पुरुष एवेदं सर्वमित्यस्यार्थमाह अ
हमित्यादिभिः सार्धैस्त्रिभिः अहं चतुर्मुखः भवान्नारदः भवो रुद्रः अग्रजाः मुनयः सनकादयः १२ १३

श्री·भा·
दि·टी·
२६

पादा इति त्रयः पादा यस्य स त्रिपात् पुरुषः परमपुरुषः ऊर्ध्वं प्रकृतिप्राकृतेभ्य उपरि ब्रह्माण्डे हृदये गतः स्वेच्छोपात्तदिव्यमंगलविग्रहः समस्तनित्यमुक्त
भोग्य आस्त इत्यर्थः अत्र पादत्रयं पादत्वं त्वेन वा स्थितमुक्तानां तत्प्राप्यस्थानस्य भोगानाह एवं च त्रयः पादाः मुक्तानीव यस्यास्य नन्त्रयस्यानन्त
स्य च भोगा विभूतित्वेन यस्य स त्रिपात् ब्रह्म जीवतस्थानापेक्षमुक्ततत्प्राप्यस्थानानां त्रिभागत्वकथनेऽनंतत्वतात्पर्यकं अस्य परमपुरुषस्य पा
दः विभूतिभूत एको भागः इह प्रकृतिमंडले अभवद्बद्धाः तत्प्राप्यस्थानानि चैकांशेन स्थितो जगत्स्याप्युताप्युतशतैकवलांशः कांशो विश्वं विचि
त्रं विदचित्स्वविभागवदभूदित्युक्तप्रकारेण तद्विभूत्यैकदेश इति श्रुत्यर्थः एतदेव व्याचष्टे पादा इति त्रयः पादास्तु बहिः प्रकृतिर्बहिकृतेभ्यो बहि
र्दिशमन् येतस्य पादास्ते अप्रजानां नरहितानां मुक्तानामाश्रमा प्राप्य इत्यर्थः १९ एकस्याबहिः स्वतस्माद् अन्तइति अपरः सांसारिकजे
जन्तूपभोग्यप्राप्यस्थानरूपः पादः त्रिलोक्याः अन्तरित्यर्थः तमेव पादं विशिनष्टि गृहमेधः अहंकारममकारादिना वर्णाश्रमान्वितजनैः

पादास्त्रयो बहिश्चासन्नप्रजानां य आश्रमाः । १९ अन्तस्त्रिलोक्यास्त्वपरो गृहमेधोऽबृहद्व्रतः । सृती विचक्रमे विश्वङ् साशनानशने उभे
यदविद्या च विद्या च पुरुषस्तूभयाश्रयः । २०

बृहद्व्रतः कर्मवश्यः उपचारात्प्राप्येष्वपि धर्मव्यपदेशः एवमपारमहिमत्वमुपपाद्याप्यप्रमेया
द्भुतगुणानां च भगवल्लीलाविभूतित्रियाविभूतिगतिहेतुमार्गद्वयप्रतिपादकं ततो विंशतिवाक्यं व्याचष्टे सृतीति विविधं सर्वगतो निविश
त्वेत्र सृतीधूमार्चिरादिमार्गौ विचक्रमे अाक्रमे व्याप्तवानित्यर्थः कथंभूते सृती साशनानशने शनं भोगः भोगार्थत्वेन तदभावाभ्यां
मार्गयोः साशनानशनत्वे साशनानशनलक्षणमार्गद्वयप्राप्त्युपायमाह यदिति यत् अविद्यामार्ग द्वयमध्ये अविद्याकर्मसंज्ञाने
त्युक्ता कर्मरूपविद्या धूमादिमार्गप्राप्त्युपायभूता एका विद्या अर्चिरादिप्राप्त्युपायभूतापरमात्मोपासनरूपा परा पुरुषो जीवस्तूभया
श्रयः साधनद्वयनिष्ठः तं विद्याकर्मणी समन्वारभेते इति श्रुतेः समन्वारभेते संगते इत्यर्थः २० एवं बुभुक्षुमुमुक्ष्वधि
कारिभेदेन तत्तन्मार्गद्वयं तदुपायं चोक्त्वा भगवतः स्वविभूतिभूतप्रपंचादिलक्षणमभगवतः प्रपंचाकारेण परिणीं तत्तदोषा राम: २६

तर पेर विद्या४ ... मे८

ति॰ १ शरीरांतरावस्थितिं जीवैर्वैलक्षण्यं चानुपपन्नमित्याशंकायां एतावानस्य महिमेत्यस्यार्थमाह महिमेति पुरुषस्य ब्रह्मचिदचिदात्मकप्रपंचांतर्बहिश्च
व्याप्य सर्वस्य प्रशासनाधीनं कुर्वतः परमात्मनएव महिमा अमृतत्वं शानरूपं महिमा दुरत्ययः अपारः ब्रह्मप्रपंचात्मकत्वेनावस्थितस्यापि प्रपंच
गतदोषासंस्पर्शित्वमस्ते शितत्वं चेत्येतदनुपपद्यमानमपि तस्य महिम्नाउपपद्यतेत्यभिप्रायः अपार महिमत्वमेवप्रतिपादयन् पादोस्यविश्वाभूतानी
तिवाक्यस्यार्थमाह पादेष्विति । तिष्ठत्यत्रेति स्थितये मरादयो लोकास्ते पादइव पादाः अंशा यस्य स्थितिपातस्य पादेषु शभूते वुलोके वुलोके सर्वे
भूतानि देवादिचतुर्विधभूतानि विदुः एतेनात्रापि पादोस्य विश्वाभूतानीति सामानाधिकरण्यमधिष्ठानाधिष्ठेययोरभेद विवक्षया
पादइत्येकवचनं च सामस्त्याभिप्रायेणेति व्याख्यातं भवति १८ ब्रह्मब्रह्मणोरसांकर्येण प्राप्यस्थानानां नानात्वं भिन्नत्वं च प्रतिपादकस्य त्रिपादस्
२ स्यामृतं दिवीत्यस्या . . . . र्थमाह अमृतमिति अस्येश्वरस्य संबंधि त्रिपात्त्रिविधममृतमक्षयममृतं दिवि ब्रह्मांडमंडलाद्बहिरिति

महिमैष ततो ब्रह्मन्पुरुषस्य दुरत्ययः पादेषु सर्वभूतानि पुंसः
स्थितिपदो विदुः १८ अमृतं क्षेममभयं त्रिमूर्ध्नोऽधायि मूर्धसु

अन्वयः अत्र त्रिपाद्ब्रह्मणस्त्रिविधत्वं दर्शयन्नाह अमृतं मरणादिविकाररहितम् अभयं तत्त्वार्थं भयरहितं क्षेमं प्रवृत्तिरूपरहितं निरतिश
यानंदरूपप्रापणमित्यर्थः अपहतपाप्मत्वादिगुणाष्टकाविर्भावरूपं स्वलैश्वर्यं कोटित्रयेणसंगृहीतं अमृतमिति विरजो विमृत्युरशो
कोक्तः क्षेममिति सत्यकामत्वाद्यनुवृत्तिं . . उक्ता अभयमित्यपहतं विशोकादिशब्दार्थ उक्तः पाप्मादि भयहेतुः भयमिति शोकादि सर्वं ईः
स्वप्रदर्शनं एवं त्रिमूर्ध्नः त्रिविधमुक्तैश्वर्यं मूर्द्धनि उपरिष्टात् त्वर्थः तमसः परस्तादितिवक्ष्यमाणलोकादित्यमेते परस्ताद्भक्तं क्षेममभयं चाधायि
तिहितमित्यर्थः मूर्धस्विति पाठे उपरिष्टाद्वर्तमानेषु त्रिषु पादेष्वित्यर्थः बहुवचनं मुक्ता नां जीवानां बहुत्वे तत्प्राप्यस्थानानां त्वेउभयो
नानाभिन्नतित्ववत्तानामस्त्रीयत्वं तत्प्राप्यस्थानं तस्यापि नानाभिन्नतित्वं चप्रतिपादये त्रिपादूर्ध्वमित्यादेरर्थमाह ॥
रामराराम राम राम राम राम राम राम राम राम राम राम राम राम रामः

श्री·भा· महात्मनः अस्य विराजः निरुद्धस्य नाभौ भवं नाभ्यं तस्मान्नलिनात्कमलात् अहं च नर्षत्वः यदा आसमभवं तदा पुरुषावयवाद्विना यज्ञसंभारान्
द्वि·टी· न्यालिपयज्ञसाधनानि विद्वान् अपश्यं २१ तेषु पुरुषावयवेषु यज्ञस्य साधनान्यासन्निति शेषः तान्याह पशव इति वनस्पतयो यूपादयः देवयजनः
स्या२ देवा इज्यन्ते अस्मिन्निति देवयजनो भूमिः इदं चेति वचनात् ब्रह्मा ईस्थाने उपविष्टः कथ्यते गम्यते बहुगुणान्वितः कालो वसंतादिः २२
नि४ वस्तूनि पुरोडाशादीनि द्रव्याणि ओषधयः व्रीह्यादयः स्नेहः आज्यादिः रसः सोमादिः लोहः सुवर्णादिः मृद् कपालादीति चातुर्होत्रं चतुर्णां होतॄणा
वाचो मंत्रैः प्रकाश्यं कर्म हे सत्तम सतां श्रेष्ठ २३ नामधेयानि ज्योतिष्टोमादीनि ऋगादीनाम् मंत्रत्वान्मंत्राः स्वाहाकारादयः व्रतं पयोभक्षणा
दिकं देवतानुक्रमः देवतानामनुक्रम उद्देशः यथा इंद्रैवेति पृथक्वादे अनुक्रमः अनुपाठः अनुप्रवादो कल्पः प्रयोगविधिः संकल्पः

यदास्यनाभ्यान्नलिनादहमासंमहात्मनः नाविदंयज्ञसंभारान्पुरुषावयवादृते २१ तेषुयज्ञस्यपशवःसवनस्पतयःकुशाः इदंचदेवयजनंका
लश्चोरुगुणान्वितः २२ वस्तून्योषधयःस्नेहारसलोहमृदोजलं ऋचोयजूंषिसामानिचातुर्होत्रंचसत्तम २३ नामधेयानिमंत्राश्चद
क्षिणाश्चव्रतानिचदेवतानुक्रमःकल्पःसंकल्पस्तंत्रमेवच २४ गतयोमतयश्चैवप्रायश्चित्तंसमर्पणं पुरुषावयवैरेतेसंभाराःसंभृतामया
२५ इतिसंभृतसंभारःपुरुषावयवैरहं तमेवपुरुषंयज्ञंतेनैवायजमीश्वरं २६ ततस्तेभ्रातरइमेप्रजानांपतयोनव अयजन्व्यक्तमव्यक्तंपुरुषंसुस
माहिताः २७ ततश्चमनवःकालेईजिरेऋषयोऽपरे पितरोविबुधादैत्यामनुष्याःक्रतुभिर्विभुं २८

कर्तव्याध्यवसायः तंत्रं क्रियाकलापः २

४ गतयो विष्णुक्रमाद्याः मतयः देवताध्यानानि अथवा कर्तव्यविषयात्वरा प्रायश्चित्तं वैकल्यसमाधानं समर्पणं देवता प्रति हविषोऽर्पणं मयापुरुषा म २
वयवैः संभाराः यज्ञसाधनानि संभृताः संपादितानि २५ इत्थं संभृताः संपादिताः संभारा येन सोऽहं तमेव पुरुषं नियंतारं यज्ञं विष्णुं तेनैव यज्ञेनैवा
यजं ईश्वरवान् अस्मि अनेन यज्ञेन यज्ञमयजन्त देवा इति मंत्रार्थ उक्तः २६ तेन देवा अयजंत इत्यस्यार्थमपरं च दर्शयति तत इति द्वाभ्यां तेनव भ्रातरः मरीच्यादयो न याम:
व प्रजापतयः सुसमाहितचित्ताः व्यक्तं इंद्रादिरूपेण अव्यक्तं स्वतः पुरुषं परमपुरुषमयाजन्निति पूर्वेण ततः २७ तत इति काले तस्मिन्नेव काले अवसरे मन्वादयः क्रतुभि २७
र्विभुं विष्णुं ईजिरे इत्यर्थः २८

सप्तार्शीर्षं च प्रतिपादनं तस्माद्विराडजायतेत्यादिवाक्यं व्याचष्टे यस्मादिति विराडुत्कारणभूतो विराट् पुरुषो निरूढः अत्र इति तिल्य
बुलोपे पंचमी यस्मात्स्वशरीरभूतात्प्रधानादुपादानाद्ब्रह्मांडशरीरः स्वयमपि भूतेन्द्रियगुणात्मकः देवादिव्यष्टिप्रपंचरूपो जज्ञे तदुक्तरूपद्व्यम
त्यागात्तत्र परिच्छिन्नः बहिरपि व्याप्तवानित्यर्थः तत्र दृष्टान्तः आश्रयात् घटपटादिजातं गोभिः किरणैरादित्य इवात्पगात् वेदान्तेषु सत्कार्यवाद
स्याभिहितत्वात्कारणभूतो विराडेव व्यष्टिरूपेण जज्ञे स्वस्वचिदचिच्छरीरको भगवानेव स्थूलचिदचिच्छरीरको जातः जातश्च स्वयं स्वशरीरस्य तच्चे
तनाचेतनगतदोषैरस्पृष्टः स्वकार्यभूतस्य स्थूलप्रपंचस्यान्तर्बहिश्च व्याप्य स्थित इत्यर्थः नामरूपविभागानर्हसूक्ष्मप्रकृतिपुरुषशरीरकस्य परमपु
रुषस्य जगदुपादानत्वादुपादानत्वास्या वस्थाश्रयत्वरूपत्वात्प्रकृतिपुरुषयोः कारणं त्वयाणामप्यवस्थाश्रयत्वमस्त्येव तत्राचेतनं द्रव्य स्था
स्याश्रयत्वं स्वरूपान्यथाभावरूपं चेतनस्य तु स्वभावान्यथाभावरूपं ईश्वरस्य तु कार्यावस्थचेतनाचेतननियन्तृत्वरूपेण हि कारणावस्थचेतना

यस्मादण्डं विराट् जज्ञे भूतेन्द्रियगुणात्मकः तद्व्याप्तत्वमात्मना विश्वं गोभिः सूर्य इवातपन्‌ २१ राम राम:

चेतन २
चेतननियमनात्कार्यावस्थचेतनाचेतननियमनमभिन्नमिति वक्तुं शक्यं किं चेश्वरस्य सद्वारकावस्थाश्रयत्वमस्त्येव स्वसंकार्येणावस्थ
नाप्रतीयत्वाच्छुक्लनीलादिनेत्वारब्धे पटे शौक्ल्यादेस्तन्तुदेशगतत्ववच्चेतनगता धर्मा अज्ञत्वपरिणामित्वादय स्तत्रैवावतिष्ठन्ते न पर
मात्मानं स्पृशन्ति यस्मान् मानुष्यत्वमनिरस्तनिखिलदोषाऽनवधिकातिशयासंख्येयकल्याणगुणगणः स्वशरीरभूतचेतनाचेतनगतस्वपर्य
तनामरूपनिर्वाहकः कारणावस्थकार्यावस्थचेतनाचेतनशरीरकत्वेन तत्तद्वाचिभिः शब्दैरभिधीयमानः सर्ववस्तुसमानाधिकृतो वर्तिष्ठत
इत्ययमत्र संग्रहः अयमर्थस्तु तस्मात्परमप्रकृत कारणात्पुरुषाद्विराडिति तस्माद्विराडजायत विराजोऽधिपूरुष इत्यत्र [illegible] भूम्यादिशरीरक
पुरुषो जज्ञे जातश्च स वैराजः स भूमिं विश्वतः पश्चादुपरिष्टादधः भूतं चात्यरिच्यत तद्भिलक्षणो व्याप्तवानित्यर्थः २१ नन्वेवं पुरुषस्य सर्वे
श्वर्यं तर्हि यज्ञस्य साधनानां चापृथक्त्वाभावात् पुरुषाराधनं न सिद्ध्यत्यार्शंक्यतत्परिहाराय यत्पुरुषेणेत्यादिमंत्रार्थं संगृह्णीयति यदेति ॥
ती

श्री· द्वि० सोऽहमिति समाम्नायमयः समाम्नायप्रचुरः तपोमयः तपःप्रचुरः विज्ञाततपोभ्यां सर्वैरन्यैरित्यर्थः प्रजापतीनां मरीच्यादीनामभिवंदितः ते
भा० टी० नमस्कृतः तेषां पतिः स्वात्मनः परमात्मनः संभव उत्पत्तिः तत्स्थानं ध्येयत्वेन सम्पन्नोऽहं समाहितः सन्निपुणं निर्विघ्नं योगं समास्थाय यः स्वमायाविभ
२८ वं स्वयं ज्ञातवान् तं परमात्मानं नाध्यगच्छं स्वरूपतो गुणतश्च तत्त्वतो नितिन ज्ञातवान् ३४ अतस्तच्चरणं प्रति केवलं नतोऽस्मि नतोऽस्मीति तच्चरणं समीयु
षां शरणं गतानां भवच्छिदं संसृतिनिवर्तकं स्वस्त्ययनं संसाराभावमात्रमपि सुमंगलं सुखमेव अनवद्यमेह दृष्टांतः यथेति दोषास्पर्शे दृष्टांतः यथा नभः
स्वं दृष्टांतः दुःस्पर्शः पणिनावायुरिति मुमुक्षुभारतोक्तेः स्वमायाविभवं स्वयं गत इत्यनेन यवनिकां गैरतिवद्वन्यानुपलम्भं मुक्तं तन्मायावशत्वं आत्म तर त्वं
मायाविभवे नान्यानुपलम्भत्वं गत इत्यर्थः एवंविधपरमात्मानम् उक्तविधोऽप्यहमेव नाध्यगच्छं सम्यङ् नाधिगच्छतीति किमु वक्तव्यमित्याह अपर इति अप

सोऽहं समाम्नायमयस्तपोमयः प्रजापतीनामभिवंदितः पतिः आस्थाय योगं निपुणं समाहितस्तं नाध्यगच्छं यत आत्मसंभवः ३४ नतोऽस्म्यहं तच्चरणं समी
युषां भवच्छिदं स्वस्त्ययनं सुमंगलं यो ह्यात्ममायाविभवं स्म पर्यगाद्यथा नभः स्वांतमथापरे कुतः ३५ नाहं न यूयं यदृतां गतिं विदुर्न वामदेवः किमुतापरे सुराः
तन्माययामोहितबुद्धयस्त्विदं विनिर्मितं चात्मसमं विचक्ष्महे ३६ यस्यावतारकर्माणि गायंत्यस्मदादयः न यं विदंति तत्त्वेन तस्मै भगवते नमः ३७
ति

रे जीवाः कुतो हेतोर्विदुरित्यर्थः ३५ एतदेवोपपादयति नेति यूयमिति सनकादीनभिप्रायेण बहुवचननिर्देशः [illegible]
महादेवो नाम कश्चिदृषिः न चाहं न च शंकरः अन्येन तीति श्रीवैशम्पायनवाक्यं तत्राह यदृतां यस्य परमात्मनः ऋतां सत्यां गतिं स्वरूपं [illegible] वसि ५२
तिं न कुर्वंति पाठे अस्मदादयो न विदुः केऽस्तु चान्ये नाहं किमुतेति कुतो न विदुरित्यत आह तन्माययेति तस्य भगवतो माया यया देवी ह्येषा गुणमयी दुरत्ययेति
धर्मायया मोहिता बुद्धिर्येषां ते तन्मायामोहितबुद्धित्वादेते न विदुरित्यर्थः तर्हि किं विदुरित्यत आह तेनैव विनिर्मितमिदमचेतनं शरीरं स्वं समात्मानं
देहेऽहंकारं मन्यामहे इत्यर्थः देहात्मविभागमप्यजानानाः कथं परमात्मवेदनमिति भावः ३६ तर्हि मायातरणोपाय इत्यत आह यस्य भगवतोऽवताराणां क रामः
र्माणि चेष्टितानि अस्मदादयः स्तुतिमुखाद्योगायंति यं तत्त्वेन याथात्म्येन न विंदंति न जानंतीति किंतु तस्मै भगवते नमस्कुर्वंति तस्य गुणकर्मानुकीर्तनमेव मायात २८
त
रणोपाय इत्यभिप्रायः ३७

एवं यद्रूपमित्यादिप्रश्नानां पुरुषसूक्तसंवादेनोत्तराण्यभिधाय यदधिष्ठानमित्येतत्प्रश्नोत्तरार्थमुपसंहरति नारायण इति आहितमवस्थितं एवं
स्वास्मिन्‌ वटरूपेणावस्थितं विश्वं स्वशरीरम् तेन मयास्र्जति ब्रह्मरूपेण रति पुरुषरूपेणानुयाति तत्पुपसंहरति गृहीतेत्यादि स्वतश्च गुणाः स
नर्॰ त्वादिगुणरहितः प्रत्यगात्मस्वरूपं हि स्वतः सत्वादिरहितमगुणोप्ययं गृहीतामायया उरवो गुणाः येन तथाभूतः सर्गादौ तन्निपुरुषस्तत्रियो उपा
सन्सृजामि हरो रुद्रः तद्वशः तदधीनः बिभ्यद्धरति पुरुषरूपेण रात्वावतार रूपेण याति अत्र तन्निपुरुषस्तद्वशइत्यनेन ब्रह्मरुद्रयोर्नियाम्यत्व प्रती
तेः पुरुषरूपेणोत्पत्र नदप्रतीतेश्च स्थितिसंहारौ ब्रह्मरुद्राख्यजीवां तर्यामित्वेन करोति पालनं तु स्वयमेव करोतीति निवेदितव्यं यतस्त्रिशक्तिधृ
क् स्थितिस्थिति संहाररूपशक्तित्रययुक्त इत्यर्थः २९ ३० यद्रूपमित्यादि प्रश्नानां यदात्मकस्त्वमित्यादि सर्वप्रश्नानां च सामान्येनोत्तरं यदुक्तं

नारायणो भगवति तदिदं विश्वमाहितं गृहीतमायोरुगुणः सर्गादावगुणः स्वतः २९ सृजामि तन्नियुक्तोहं हरो हरति तद्वशः विश्वं पुरुष
रूपेण परिपाति त्रिशक्तिधृक् ३० इति ते ऽभिहितं तात यथेदमनुपृच्छसि नान्यद्भगवतः किंचिद्भाव्यं सदसदात्मकं ३१ न भारती मे
ऽङ्ग मृषोपलक्ष्यते न वै क्वचिन्मे मनसो मृषा गतिः न मे हृषीकाणि पतंत्यसत्पथे यन्मे हृदौत्कंठ्यवता धृतो हरिः ३२ राम रामः
वासुदेवात्परो ब्रह्मन्‌ न चान्यो ऽर्थो ऽस्ति तत्वत इति पूर्वमेवेदं सर्वं इति स्तुत्या च तद्दृढीकृतं तदुपसंहरति इतीति हे तात तदिदं विश्वं प्रति यथाज्ञत्
चेतनार॰ पृच्छसि विश्वविषयप्रश्नं करोषि तत्प्रश्नस्योत्तरं चेत तन्मात्मकं कृत्स्नं जगत्किंचिदपि भगवतः अन्यत्पृथगिति न भाव्यं नानुसंधेयमिति ते तुभ्य
मभिहितं कथितमित्यर्थः ३१ यदुक्तमेतावत्त्वं यतो हि मेतमविज्ञाय मामीश्वरं प्रकृष्टीतितदुपपादयितुमुपसंहरति न भारतीति मे ऽ नर॰
भारती वाङ्मृषामिथ्या न दृश्यते मे मनसोगतिः वृत्तिः न मे हृषीकाणीन्द्रियाणि असत्पथे ऽसद्विषये न यतं ति न प्रवर्तंते
यस्मान्मयौत्कंठ्ये श्वासातध तो हृदये न हरिर्धृतः ध्यातः अंगहेतारहमृतो मे वाङ्मनइन्द्रियाणि न त्रयः सत्यार्थी न मतत्रमा
वेनैत्यर्थः ३२ अतो मम अपि ज्ञानप्रदो मदश्चित्यत्वरूपत्वभावः सर्वेश्वे मन्नोत्या ... स्तीत्याह ॥ ॥=ः ॥=ः ॥ ॥
किंतुभगवत्यैवेन॰
भा
रो॰

श्री॰भा॰ वि॰टी॰ २९ द्वि॰४

अथावतारांस्तत्कर्माणि च विवक्षुरादिमवतारमाह आद्य इति पुरुषः विराट्पुरुषः परस्य विष्णोराद्योऽवतार इत्यर्थः आद्यत्वमस्य कूर्माद्यपे
क्षया अस्य विभूतीराह कालइत्यादिभिः कालादयः रूपवत् स्वरूपमित्युक्तेरन्वयः रूपवतश्च कर्मक्षतत्त्व पश्यत्स्वरूपं स्वीयं कं पं शरीरं काला
दयस्तन्निमाम्नवर्गरूपविभूतिरिति परंतत्वं कालानां परं येषामात्म्यमित्यर्थः स्वभावः प्रकृतिगतपरिणामस्वभावः सदसन्मेच्च नन्नमचेतनं स्थूलं
सूक्ष्मं वा द्रव्यं पृथिव्यादि विकारो महदहंकारादिः गुणः सत्वादिः इंद्रियाणि ज्ञानकर्मात्मकानि विराडितरि हं स्वराट् स्वलोकस्याधिपत्येनावस्था
कृत इति विराट् स्वरूप स्वराट् सोऽस्य तालोकस्तु केः स्थास्नु स्थावरं चरिष्णु जंगमं भूम्नः भगवतो भगवतः ४१ किं बहुनाऽसंख्येणाऽऽह
अहमिति अहं ब्रह्मा भवो रुद्रः यज्ञो विष्णुः यद्यप्ययं विभूतिमध्ये पठितः तथापि नैतस्य रश्मीतराभावात् पालनाधिकृत विष्ण्वव॰ ति॰८

आद्योऽवतारः पुरुषः परस्य कालः स्वभावः सदसन्मनश्च द्रव्यं विकारो गुणइंद्रियाणि विराट् स्वराट् स्थास्नु चरिष्णु भूम्नः ४१ अहं भवो य
ज्ञ इमे प्रजेशा दक्षादयो ये भवदादयश्च स्वर्लोकपालाः भुवर्लोकपालाः स्वर्लोकपालास्तललोकपालाः ४२ गंधर्वविद्याधरचारणेशा ये यक्षर
क्षोरगनागनाथाः ये वा ऋषीणामृषभाः पितॄणां दैत्येंद्रसिद्धेश्वरदानवेंद्राः ४३ अन्ये च ये प्रेतपिशाचभूतकूष्मांड्यादोमृगपक्ष्यधीशाः ४४

तारगत पालनानुगुणं यत्सामर्थ्यं तस्य विभूतित्वद्योतनाय यज्ञोपि विभूतिषु पठितः विभूतित्वं नाम नियाम्यत्वं सर्वभूतानां प्रवर्तनक्षेति
सर्वेषां स्वतयावस्थानात् आत्मा हि तावच्छरीरस्य सर्वात्मना धारो नियंता शेषी च भगवतः स्वविभूतिभूतेषु सर्वेषु स्वतयावस्थानमे
वच चितनष्ठचसामानाधिकरण्यनिर्देशहेतुः भगवत्यात्मतयावस्थिते हि सर्वे शब्दास्तस्मिन्नेव पर्यवस्यंति यथा देव मनुष्य पक्षि वृक्षा
दयः शब्दाः शरीराणि प्रतिपादयंतस्तदात्मनि पर्यवस्यंति दक्षादयोऽस्मे प्रजेशाः भवदादयो नारदप्रभृतयः सनकादयः लोकपाला
पालिकेष्वाः तललोकपालाः पातालेश्वराः ४२ गंधर्वादीनामीशा उरगाः सर्पाः नागा गजाः यक्षादीनां ये नाथाः रक्षोरगेति संधि
रार्षः ऋषीणां पितॄणां ये श्रेष्ठाः दैत्या दितिपुत्राः तेषां इंद्राः ४३ अन्ये च ये प्रेतादीनामधीशाः ४४ श्रीमते रामानुजाय नमः राम: २९

वेलोकेष्वत स्वसर्वतो २

केः क्तारः कानि चेष्टितानि च यदनुकीर्तनेन मापांतरं नीत्वा शंकर्वा बनारांतत्कर्माणि च तद्रूपमित्यादि अज्ञानांउत्तराण्युपसंहरति सएषइति अजः कर्माधीनजन्मरहितः एष आद्यः कारणभूतः परमपुरुषः कल्पे कल्पे प्रतिकल्पमात्मन्या धारे आत्मना परमात्मभूतेनात्मानं उपा दानमात्मैव कर्ता सृजति संयच्छति संहरति पाति च ३९ ननु यं जगद्व्यापारो भगवतः किं कर्माधीन इत्याशंक्याह विशुद्धमिति पुण्य पापरूपकर्मरहितमतो न जगद्व्यापारः कर्माधीन इत्यर्थः एवं च कर्माधीनव्यापारजीववत्तद्रूपाद्वैलक्षण्यमप्युक्तं भवति जीवविलक्षणं चेत् त्किं जडमित्यत आह केवलं ज्ञानं चिद्रूपमजडमित्यर्थः तर्हि किं घटपटाद्याकारवृत्तिज्ञानमित्यत आह प्रत्यक् स्वस्मै भासमानं ननु जीवोऽप्येवंरूपोऽत आह सम्यगवस्थितं अर्थान्तरानपेक्षस्थितिं जीवस्तु परमात्मधर्मैः स्थित्यभिप्रायः अन्यान्यपि चेतनाचेतनविलक्षणा

सएष आद्यः पुरुषः कल्पे कल्पे सृजत्यजः आत्मात्मन्यात्मनात्मानं संयच्छति च पाति ३८ वि
शुद्धं केवलं ज्ञानं प्रत्यक् सम्यगवस्थितं सत्यं पूर्णमनाद्यन्तं निर्गुणं नित्यमद्वयं ३९ ऋषे
ता विदन्ति मुनयः प्रशान्तात्मेन्द्रियाशयाः यदा देवासत्तर्कैस्तिरोधीयेत विप्लुतं ४० राम

कारणताह सत्यं स्वरूपतो धर्मतश्च निर्विकारमतेन स्वरूपतोऽविकार्यचेतनद्रव्यं स्वभावतो विकारी चेतनश्च व्यावृत्तः पूर्णमवा प्तसमस्तकामं निर्गुणं सत्वादिरहितमनाद्यन्तं उत्पत्तिनाशरहितमत एव नित्यं कालाद्यवच्छिन्नं अद्वयं समाभ्यधिकरहितं एतेषपा संभवं चेतनाचेतनव्यावर्तकत्वेनानुसंधेयाः ३९ अत्र विद्वदनुभवं प्रमाणयति ऋषे इति हे ऋषे नारद आत्मान्तःकरणमाशयो वा सनाप्रशान्ता आत्मेन्द्रियाशया येषां ते कवयः उक्तविधं परमात्मस्वरूपं जानन्ति कवयः समीचीनतर्कैर्विविच्यत स्वरूपं चेतनाचेतन विलक्षणं शोधयन्ति कुतर्कैर्दुर्ज्ञेयत्वमाह असत्तर्कैर्हेतुवादैर्यदा विप्लुतं उपद्रुतं स्यात्तदा तिरोधीयेतेत्यर्थः ४०

श्री·भा० कपिलावतारमाह जज्ञ इति कर्दमप्रजापतेर्गृहे तद्भार्यायां देवहूत्यां हे द्विज नारद नवभिः स्त्रीभिर्भगिनीभिः सह जज्ञे जातः स च स्वमात्रे आत्म
द्वि०टी गतिमात्मज्ञानं मोक्षमार्गं वा ऊचे कथितवान् यया आत्मगत्या सा देवहूतिरात्मशमलं मलमस्मिन्देहे जातं गुणसङ्गपङ्कं गुणात्रसङ्ग एव पङ्कः तं वि
३० धूय कपिलस्य गतिं कपिलोक्तगतिं प्राप्तवती ३ दत्तात्रेयावतारमाह अत्रेरिति अपत्यं पुत्रमभिकाङ्क्षतोऽभिकाङ्क्षमाणादत्रेः तुष्टः सन् यदाह
मेव तुभ्यं दत्त इति यद्यस्मादाह ततः स भगवान् दत्त इति जातः स्वभक्तेभ्यो योगैश्वर्यसम्पत्तिं दत्तवानित्यर्थं दर्शयति यस्य पादयोः पङ्कजयोः परागेण
पवित्रिताः देहा येषां ते हैहयाद्याः सहस्रार्जुनप्रमुखाः यदवः दत्तात्रेयात् उभयीमैहिकामुष्मिकीं योगर्द्धिं योगैश्वर्यमणिमाद्यैश्व
र्यरूपामैहिकीं मुक्तिरूपामामुष्मिकीं च योगर्द्धिमापुः प्रापुः उभयीमित्यो यद्वा यदुर्ययातिपुत्र इति ४ कुमारावतारमाह तप्तमि

जज्ञे च कर्दमगृहे द्विज देवहूत्यां स्त्रीभिः समं नवभिरात्मगतिं स्वमात्रे ऊचे ययात्मशमलं गुणसङ्गपङ्कमस्मिन्विधूय कपिलस्य गतिं प्रपेदे ३ अत्रेरप
त्यमभिकाङ्क्षत आह तुष्टो दत्तो मयाऽहमिति यद्भगवान्स दत्तः यत्पादपङ्कजपरागपवित्रदेहा योगर्द्धिमापुरुभयीं यदुहैहयाद्याः ४ तप्तं
 तपो विविधलोकसिसृक्षया मे आदौ सनात्स्वतपसः स चतुःसनोऽभूत् प्राक्कल्पसम्प्लवविनष्टमिहात्मतत्त्वं सम्यग्जगाद मुनयो यदचक्षतात्मन् ५

ति नानाविधलोकानां स्रष्टुमिच्छया मम यत्तपस्तप्तं तस्मात्स्वतपसो मम तपसः हेतोः स हरिरादौ सनात् दीर्घ आर्षः सनत्वेन सनकः
कथंभूतः चतुः चतुर्धा सनः सनको यस्य स चतुःसनः अथवा सनातनसनन्दनौ द्वितीयतृतीयौ अभूतामित्यभिप्रायः यद्वा चतुः
सनाः चत्वारः सनत्कुमारान्ता यस्य स चतुःसनः अस्मिन्कल्पे आदौ कल्पादौ सनदिति तपोविशेषणमखण्डितादित्यर्थः यद्वा तपस
इति षष्ठ्यन्तं तपसः सनात्समर्पणादित्यर्थः सनुदाने स च जातो हरिः पूर्वकल्पसम्प्लवे प्रलये विनष्टं विच्छिन्नसम्प्रदायं आत्मतत्त्वं कृत्स्नमस्मि
न्कल्पे सम्यक् जगाद उक्तवान् सम्यक्त्वं दर्शयति यदिति यदात्ममेव मुनयः आत्मन्यात्मनि मनसि स्मृतयः साक्षादपश्यन् यद्वा य रामः
दुदितमेवात्मनि तत्त्वं मुनयः अचक्षत अन्येभ्यो व्युक्तवन्त इत्यर्थः ५ ३०

स्वतपसः ६ इति पाठे ६

स

किंबहुना यदिति यत्किंचिद्भगवदादितत्सर्वं रूपंवतः स्वरूपमित्यन्वयः भगवदैश्वर्यवन्महत्त्वतेजस्त्वदोजस्वड्साहवस्महत्त्वद्भगवद्वैर्य
वच्छलवत् धारणासामर्थ्यवत्क्षमावत्सहनवत् श्रीशोभाह्रीर्लज्जाविभूतिर्नियाप्यवर्गः आत्मा बुद्धिस्तद्युक्तं अद्भुतार्णमद्भुतशब्दवाच्यं एतत्स
र्वंरूपवतः प्रशंसायामतुप् अकर्मकृत् स्वेच्छापातदिव्यमंगलास्पदविग्रहस्य भगवतो विराट्पुरुषस्य स्वीया विभूतिरित्यर्थः ४५ अवतारा
णामनंतत्वात्तत्रप्रसिद्धान्वक्ष्यामीत्याह प्रधान्यत इति अस्तकथाश्रवणैः येकर्णयोः कषायाः मलाः तान्शोषयंतीति तैः पा सुपेशान् सुंदरान् त४
हेऋषेवदंतिमुनयइतिशेषः ऋषयइतिपाठे ऋषयोवदंतीत्यन्वयः तान्तेतुभ्यमनुक्रमिष्येक्रमेणवर्णयिष्यामि तदनुक्रमेणमत्तत्त्वया
वा६ आपीयतांइतिशत्रंतैआपिवतांकर्णकषायशोषानित्यर्थः ४६ इतिद्वितीयेषष्ठः ६ एवंप्रतिज्ञायावतारांस्तत्कर्माणितत्प्रयोजनानितद्गुणांश्च

यत्किंचलोकेभगवन्महस्वदोजःसहस्वद्बलवत्क्षमावत् श्रीह्रीविभूत्यात्मवदद्भुतार्णंतत्त्वंपररूपवत्स्वरूपं ४५ प्रधान्यतोयानृषः
आमनंतिलीलावतारान्पुरुषस्यभूम्नः आपीयतांकर्णकषायशोषाननुक्रमिष्येतइमान्सुपेशान् ४६ इतिश्रीभा० द्वितीयस्कंधेष
ष्ठोध्यायः ६ ब्रह्मोवाच यत्रोद्यतः क्षितितलोद्धरणायबिभ्रत्क्रौडींतनुंसकलयज्ञमयीमनंतः अंतर्महार्णवउपागतमादिदैत्यंतंदंष्ट्रयाद्रि ४
मिववज्रधरोददार १ जातोरुचेरजनयत्सुयमान्सुयज्ञआकूतिसूनुरमरानथदक्षिणायां लोकत्रयस्यमहतीमहरद्यदार्तिं स्वायंभुवेनमनुनाहरिरित्य

नूक्तः यत्रैत्यादिना यत्रयदाकालेक्षितितलोद्धरणार्थंसकलयज्ञमयींक्रौडींवाराहींतनुंबिभ्रत्सन्नुद्यतोनंतोपरिछिन्नस्वरूपस्वभावोभगवान्
द्भूयांतर्महार्णवमसमुद्रस्यांतः उपागतंसमागतंहिरण्याक्षइतिप्रसिद्धमादिदैत्यंदितेः प्रथमंपुत्रंदंष्ट्रयाविदारितवान् तत्रदृष्टांतः वज्रधरइंद्रः अ
द्रिमिवेत्यर्थः १ सुयज्ञावतारमाह जातइति रुचेः प्रजापतेः सकाशात्तद्भार्यायामाकूतेः सनुः सुयज्ञोनामजातः सचस्वभार्यायां दक्षिणायां
यामाख्यगणयुक्तान्यामान्देवानित्यर्थः यज्ञस्यदक्षिणायांतुपुत्राद्वादशजज्ञिरे यामाइतिसमाख्याताइति वचनात् तद्भार्यायाआकूतेःस
नुः सरविंद्रः सन्नार्तिंपदाः इह इत्तदापूर्वोक्तयज्ञइत्युक्तोप्यनुपश्चान्मातामहेनमनुनाहरिरित्युक्तः अनेनदेवोत्पादनलो
कत्रयार्तिहरणंचकर्मदर्शितं एवंसर्वत्रावतारस्तत्कर्मचज्ञेयं ॥२॥ राम राम राम राम ।।=

श्रीभा॰
द्वि॰टी॰
३१

पृथ्ववतारमाह यदिति यः पृथुः ऋषिभिरर्थितः वेनं त्रात्वा जगति पुत्रपदं लेभे सोऽप्येकोऽवतार इत्यर्थः पुत्रपदं पुन्नाम्नो नरकाद्यस्मात्त्रायते
तत् तस्मात्पुत्र इति श्रुतेः स्वयमेव चायं स्मृतौ वेदितिव्युत्पत्तिस्मरणात् पुन्नाम्नो नरकात्त्रिनरं वै तं संरक्ष्य पुत्रपदवाच्यतां प्राप्तवानित्यर्थः क-
थम्भूतं वेनं निरये नरके पतन्तं तत्कुतः द्विजानां मुनीनां शापवाक्यमेव वज्रं तेन विप्लुष्टं विशेषेण दग्धं पौरुषं भगमैश्वर्यं च यस्य तं द्विजशापः
कुतस्तत्राह उत्पथगतमसन्मार्गवर्तिनं एतदाख्यानं चतुर्थे स्फुटं गतस्यैव चरित्रं तत्राह येन पृथुना वसुधाभूमिः सर्वाणि वस्तून्य-
न्नादिद्रव्याणि दुग्धा दुहात् धातु द्विकर्मकः ९ ऋषभावतारमाह नाभेरिति यद्वृत्तं पारमहंस्यं परहंसप्राप्यं पदं स्वरूपं ऋषयो वेदा आ-
मनन्ति तत्स एव हरिः कपिलादिवत्स्वांशेन ऋषभाख्यो राज्ञा नाभेः राज्ञ्यां सुपुत्रात्सुदेव्याः तत्र यस्मेरुदेव्या एव सुदेवीत्यपि संज्ञा योजातोऽऋषभः

यद्वेनमुत्पथगतं द्विजवाक्यवज्रविप्लुष्टपौरुषभगं निरये पतन्तं त्रात्वार्थितो जगति पुत्रपदं च लेभे दुग्धा वसूनि वसुधा सकलानि येन ९ नाभे-
रसावृषभ आस सुदेवीसूनुर्यो वै चचार समदृग्जडयोगचर्यां यत्पारमहंस्यमृषयः पदमामनन्ति स्वस्थः प्रशान्तकरणः परिमुक्तसंगः १० सत्रे
ममास भगवान्हयशीर्ष एवं साक्षात्स यज्ञपुरुषस्तपनीयवर्णः छन्दोमयो मखमयोऽखिलदेवतात्मा वाचो बभूवुरुशतीः श्वसतोऽस्य नस्तः ११

3/

२२

जडवद्योगचर्यां चचार तत्र हेतुः समदृक् सर्वस्यापि स्वात्मकत्वेन समदर्शनः तथा च स्वात्मकत्वं व्यावर्त्तयति स्वस्थः स्वे महिम्नि प्रतिष्ठितः
इति श्रुतेः स्वस्मिन्नेव स्थितः न त्वात्मातिरेकेणेत्यर्थः जडयोगचर्याचरणे हेत्वन्तरमाह प्रशान्तकरणः प्रशान्तेन्द्रियः तत्कुतः परिमुक्तसंगः परितः शब्दादिभ्यः मु-
क्तः त्यक्तः संगः आसंगो येन सः १० हयग्रीवावतारमाह सत्र इति स एव साक्षाद्भगवान्मम ब्रह्मणः सत्रे हयशीर्ष आस सकलपूज्यः तपनीयं सुवर्णं त-
द्वद्वर्णो यस्य छन्दोमयो वेदमयः वेदोत्पादकत्वेन तत्प्रचुर इत्यर्थः मखमयः यज्ञाराध्यः अखिलदेवतात्मा अखिलानां देवतानामात्मा सर्वा आत्मनोऽन्या
न्या देवता इति श्रुतेः श्वसतः निश्वसतः तस्य हयग्रीवस्य नस्तः नासिकातः उशतीः कान्ताः वाचः वेदवाचः बभूवुः तस्य ह वा एतस्य महतो भूतस्य निश्वसि- राम:
तमेतद्यदृग्वेद इति श्रुतेः वेदानां तद्विहितकर्मणां तदाराध्यदेवतानां तत्प्रवर्त्तकत्वेन तदाराध्यत्वेन तदात्मकत्वादुक्तानि इति ११ ३२

न१

नरनारायणावतारमाह धर्मस्येति धर्मस्य पत्न्यां दक्षदुहितरि मूर्तौ । स्वांशेन नारायणो नर इति मूर्तिद्वयेन स हरिः स्वयमजनि ततः कथंभूतः स्व
असाधारणं तप एव प्रभावो यस्य सः यद्वा स्वविषयकं यत्तपस्तस्य प्रभावो यस्य सः उपास्यान्तराभावात् प्रभावमेवाह अनङ्गपृतनाः मन्मथ
सेनादेव्यः अप्सरसः परमात्मनो भगवतः अनियमावलोपं नियमलोपाभावं दृष्ट्वा घटितुं तद्वशीकर्तुं न शक्नुवन्त्यः ६ किंच काममिति
रोषदृष्ट्या कामं दहन्ति तिष्ठन्तु ते रोषं त्वात्मानं तद्दहन्तमसह्यं मोदमशक्यं न दहन्ति नाभिभवन्ति किंतु तेनैवाभिभूयन्ते इत्यर्थः सोयं रोषः यदन्तरं यस्य
भगवतो मनः प्रति प्रविशन्नलं बिभेति प्रवेष्टुमधिकं बिभ्यतीत्यर्थः अस्य मनः कामः मन्मथः कथं नु श्रयेत न कथमपीत्यर्थः कामेन

धर्मस्य दक्षदुहितर्यजनिष्ट मूर्त्यां नारायणो नर इति स्वतपःप्रभावः दृष्ट्वात्मनो भगवतो निय
मावलोपं देव्यस्त्वनङ्गपृतना घटितुं न शेकुः ६ कामं दहन्ति कृतिनो ननु रोषदृष्ट्या रोषं दहन्तमपि
न दहन्त्यसह्यं सोयं यदन्तरमलं निविशन् बिभेति कामः कथं नु पुनरस्य मनः श्रयेत ७
विद्धः सपत्न्युदितपत्रिभिरन्ति राज्ञो बालोपि सन्नुपगतस्तपसे वनानि तस्मा अदाद्ध्रुव
गतिं गृणते प्रसन्नो दिव्याः स्तुवन्ति मुनयो यदुपर्यधस्तात् ८ श्रीमते रामानुजाय

चाप्यजेयं रोषं जितवतो मनः कामः कथं श्रयेदित्यर्थः ७ चरित्रेणैव कमप्यवतारं सूचयति विद्ध इति राज्ञ उत्तानपादस्यान्ति अन्तिके
मातुः सपत्न्याः सुरुच्या उदितान्येव वाक्यान्येव पत्रिणो बाणास्तैर्विद्धः ताडितः बालोपि सन् तपसे तपश्चर्तुं वनानि यो ध्रुवो गतः
तस्मै गतवते ध्रुवाय गृणते स्तुवते प्रसन्नो यो हरिः ध्रुवगतिं स्थानं पदं अदात् सोप्येकोऽवतारः इत्यर्थः ध्रुवगतिं विशिनष्टि
यदुपरि ध्रुवगतेरुपरि ऊर्ध्वं अधस्ताच्च दिव्या मुनयः सप्तर्षिप्रमुखाः स्तुवन्ति ध्रुवगतिप्रभावं प्रशंसन्तीत्यर्थः ८

श्री·भ· हरिसंज्ञकावतारमाह अंतरिति द्वाभ्यां यूथपतिः गजयूथस्य पतिः गजेंद्रः अंतः सरसि सरोमध्ये उरुबलेनाधिकबलेन ग्राहेण मकरेण
द्वि·टी· पदे गृहीतः अत एवार्तः दुःखितः अंबुजं हस्ते यस्य स धृतांबुजो धृतहस्तः सन्निदमाह किमित्यत आह हे आदिपुरुष कारणपुरुष हे तीर्थ
३२ श्रवः तीर्थं विशुद्धं श्रवः कीर्तिर्यस्य सः तस्य संबोधनं हे तीर्थश्रवः हे श्रवणमंगलनामधेय श्रवणेनैव मंगलं कल्याणं संपादकं ना
मधेयं यस्य सः ईदृश हे रक्षेति नाम नेसाहेत्यर्थः १५ तच्छ्रुत्वा गजेंद्रस्य वचः श्रुत्वा शरणार्थिनं शरणार्थिनं कृतं अंगुष्ठाग्रं गृह्य भगवान्कृपया तस्मात्
ग्राहादुज्जहार उद्धृतवान् किं कृत्वा चक्रेण सुदर्शनेन नक्रस्य वदनं विनिपाट्य विदार्य कथंभूतो भगवान्पतगानां पक्षिणां राजा गरुडः तस्य

अंतः सरस्युरुबलेन पदे गृहीतो ग्राहेण यूथपतिरंबुजहस्त आर्तः आहेदमादिपुरुषाखिललोकनाथ तीर्थश्रवः श्रव
32 णमंगलनामधेय १५ श्रुत्वा हरिस्तमरणार्थिनमप्रमेयश्चक्रायुधः पतगराजभुजाधिरूढः चक्रेण नक्र
वदनं विनिपाट्य तस्माद्धस्ते प्रगृह्य भगवान्कृपयोज्जहार १६ ज्यायान्गुणैरवरजोप्यदितेः सुतानां लोकान्विच
क्रम इमान्यदथाधियज्ञः क्ष्मां वामनेन जगृहे त्रिपदच्छलेन याच्ञामृते पथि चरन्प्रभुभिर्न चाल्यः १७

भुजयोरधिरूढः आरूढः चक्रायुधधरः अप्रमेयः अपरिच्छिन्नस्वरूपस्वभावः १६ वामनावतारमाह ज्यायानिति अदितेः सुतानां
द्वादशादित्यानां मध्ये अधियज्ञः यज्ञाधिपतिर्भगवान् अवरजः कनीयानपि गुणैर्ज्यायान् श्रेष्ठः गुणानेवाह यद्यतः स्मात् लोकान्विचक्रमे पा
दविन्यासैः क्रांतवान् अथ प्रतिस्मृतानंतरमेव तत्र हेतुः बलेः अकंपवर्तिनः सकाशात् भूमिं वामनेन रूपेणातिशयेन वामनेन रूपेण जगृहे तत्र वा राहे२
नन्वीश्वरः स्वयं बलवान् किमिति तथा चक्रे तत्राह याच्ञामृते याच्ञां विना पथि धर्ममार्गे प्रवर्तमानः प्रभुभिः समर्थैरपि न चाल्यः ऐश्व राम:
र्यांशतोऽपीत्यर्थः १७ ननु तर्हि याच्ञयापि चालनमनुचितमेवेत्याशंक्य प्रभुरस्य बलेर्लौकिकस्यैश्वर्यमंशश्च एवेत्याशयेनाह ॥ ३२

मत्स्यावतारमाह मत्स्यइति मत्स्यो भाविना वैवस्वतेन मनुनोपलब्धः दृष्टः सोऽणिमयः अणिमासिद्ध्युपयोगिपार्थिववद्ध्यमयः पार्थिववद्ध्य
अयइत्यर्थः अतएवनिखिलजीवनिकायानां समस्तजीवसमूहानां निकेतुः निलयः मत्स्यमनुरक्षोद्दिष्टनिखिलान्वेदमार्गान्वैदिकप्रमाणान्यादायसम
र्थ्यमहत्त्वमितिशेषः वेदरूपप्रमाणत्वदानमेवास्यावतारस्यफलं यः तत्र उदकमये निसर्गे करेपुगांतसलिलेविहारविहृतवानहेतिरूपैः रतदा
ख्यानमरूढमेस्पष्टं १२ कूर्मावतारमाह क्षीरोदधाविति क्षीरसमुद्रेऽमृतलब्धये अमृतलाभार्थममरदानवयूथपानां सुरासुराणां अस्त्रे
प्रतामयतेककुर्वतां सतामादिदेवो भगवान् कच्छपवपुः धृतकूर्मतनुः पृष्ठे तत्पृष्ठभागेन गोत्रं मंदरपर्वतं विदधारविधृतवान कथं
भूतोविदधारनिद्राव्रणः निद्रायाः व्रणः अवसरः उत्सवो यस्यसः अद्रिपरिवर्त्तकषाणांकंडूर द्रेर्मेरस्यपरिवर्त्तः परिभ्रमणएवकषाणः

मत्स्यो युगांतसमये मनुनोपलब्धः क्षोणीमयो निखिलजीवनिकायकेतः विश्रंसिताननुमयेसलिलेसरवाल्लेऽत्यादायतत्र
विजारहवेदमार्गान् १२ क्षीरोदधावमरदानवयूथपानामुन्मग्नजाममृतलब्धयआदिदेवः पृष्ठेन कच्छपव
पुर्विदधारगोत्रं निद्राव्रणोद्रिपरिवर्तकषाणकंडूः १३ त्रैविष्टपोरगभयप्रहासमतलिसिंहरूपं कत्वाऽसमदृकुटिदं
ष्ट्रकरालवक्त्रं दैत्येंद्रमाशुगदयाभिपतंतमाराद्दूरोतिपात्य विददार नखैः स्फुरंतं १४ श्रीमतेरामानुजायनमः

कषाणं यस्यासौ अद्रिपरिवर्त्तकषाणा तया विधाकंडूः कंडूः तिर्यस्यसतथोक्तः कषाणा इतिदीर्घआर्षः मंदरभ्रमणेसंघर्षितकंडूरित्यर्थः
१३ नृसिंहावतारमाह त्रैविष्टपेति त्रिविष्टपेस्वर्गेभवाः त्रैविष्टपादेवास्तेषां उरगभयं तत्त्व रतीतित्रैविष्टपोरगभयहारितयाविधं नर
सिंहरूपं कृत्वाधृत्वाकथंभूतं असमदृकुटिदंष्ट्राकरालवक्त्रं असमा अनुपमा कराल भयंकरंवक्त्रं यस्मिंस्तथाविधं तदा रौद्रमीयो
आशुशीघ्रंगदयाउपलक्षितं अभिमुखमापतंतं दैत्येंद्रं हिरण्यकशिपुंस्त्रोतोस्त्र्यो रोतिपात्य पातयित्वा नखैर्विददार विदारि
तवान स्फुरंतं परितोगच्छंतं भयहासमनृसिंहरूपमितिपाठे तस्मैवमर्वभयनिवर्त्तकमित्यर्थः १४

श्री॰भा॰ धन्वंतर्यवतारमाह धन्वंतरिरिति भगवान्स्वलोके धन्वंतरिरूपेणावतीर्य पुरुरुग्जां मरिदुःखानां महारोगिणां स्वनाम्नैव रुजः रोग
द्वि॰टी॰ न्हरति कथंभूतः स्वयमेव कीर्तिः इति कीर्तिः यस्य तिशयोक्तिः अमृतं मरणं अत्यसायुष्यमायुर्वेदं तस्मै प्रतिषिद्धं यतो भागमवाप लेभे आ
३२ युर्वेदं च वेदं चानुशास्त्रं प्रवर्तयति २१ परशुरामावतारमाह क्षत्रमिति विधिनादैवेन हतमपायमत्यवेउपक्रांतं मर्यादितं ब्रह्मध्रुग्ब्र
ह्मणोद्रोग्धृ तीतितथा अतः उज्झितं तत्पथः पंथा वेदमार्गो येन अनुतापवन्नरकार्तिं नारकं दुःखं लिप्सुं लब्धुमिच्छुं एवंभूतं भवेनः
कंटकतुल्यं तत्र क्षत्रियकुलं सो महात्मा भार्गवरामरूपो हरिरुरुधारपरश्वधेन दीप्तिधारेण परशुना त्रिःसप्तकृत्वा एक
विंशतिवारं उग्रवीर्यः अमेयवीर्यः सन्नुद्धृतिउत्पाटयति २२ रामावतारमाह अस्मदिति अस्मदत्तरहेतमनुखस्मद्दत्तवरो रोधेना गुर्ख

धन्वंतरिश्च भगवान्स्वयमेव कीर्तिर्नाम नाम्ना न्रणां पुरुरुजां रुजआशु हंति यज्ञे च भागममृतायुरवाप रुध्यमायुश्च वेदमनुशास्त्यवतीर्य लो
33 के २१ क्षत्रं क्षयाय विधिनोपभृतं महात्मा ब्रह्मध्रुगुज्झितपथं नरकार्तिलिप्सु उद्धंत्यसाववनिकंटकमुग्रवीर्यस्त्रिःसप्तकृत्व उरुधार ?
परश्वधेन २२ अस्मत्प्रसादसुमुखः कलया कलेश इक्ष्वाकुवंश अवतीर्य गुरोर्निदेशे तिष्ठन्वनं सदयितानुज आविवेश यस्मिन्विरुध्य दशकं ?
धर आर्तिमार्च्छत् २३ अस्मा अदादुदधिरूढभयांगवेपो मार्गं सपद्यरिपुरं हरवद्दिधक्षोः दूरेसुहृन्मथितरोषसुशोणदृष्ट्या तातप्यमानमकरोरगनक्र ?

वतीर्णः शलिभाव कलेशः प्रकृतिपुरुषयोरधिपतिः कलया भरतादिरूपया इक्ष्वाकुकुले अवतीर्य गुरोर्दशरथस्य पितुर्निदेशे आज्ञायां तिष्ठन्
आज्ञापालनपरः सदयितानुजः सीतालक्ष्मणाभ्यां सहितः वनं दंडकाख्यं विवेश यस्मिन् रामे विरुध्य विरोधं कृत्वा दशकंधरो
रावणः आर्तिं नाशमार्च्छत् प्राप्तः २३ यस्मै श्रीरामाय उदधिः समुद्रः मार्गमदात् कथंभूतो दात् सपदि शीघ्रं दूरेरुध्य यथा त्रिपुरं
द२ दिधक्षोर्दग्धुमिच्छुः हरवद्रिपुरं लंकां दिधक्षोः तस्माच्छ्रीरामाद्भीतो रूढभयांगवेपः रूढं प्राप्तं भयं यतो नो गवेपः कंपो यस्य सः दूरेवर्तमानात्सुहृत्सीतातया निमित्त
भूतया मथितः क्षुभितः यो रोषस्तेन सुशोणा दृष्टिः श्रीरामस्य बाधितो नत या तातप्यमानं मकरोरगनक्रागोचचक्रं तस्माद्यस्मिन्तारावं भूतो ध्विः नामः
मार्गमदादित्यर्थः २४ ३२

नार्थ इति उरुक्रमस्य विक्रमपादविन्यासस्य हरेः पादक्षालनं प्रत्युपयुक्ता आपः आङ्गाय इति छेदः आसमंताच्छिखायां मूर्ध्नि धृतवतः यद्वा मूर्धा आ समंताद्धृतवतः बलेरस्य विबुधाधिपत्यं नार्थः न स्वर्गस्य प्रयोजनमित्यर्थः एतदेवोपपादयति यो बलिः प्रतिश्रुतमृते प्रतिज्ञातार्थं विनान्यन्न चिकीर्ष
कर्तुं नैच्छत् दद्म्येव आपे किंतु तस्मात्त्वमङ्ग हे नारद हरये मनसाभिमेने भगवन्तं च्छेत्त्वमतः सात्मानं हरये समर्पितवान् अङ्गकेण वारितः शक्रो
को॰४ पि अन्यथा कर्तुं नैच्छत् किंतु तृतीयपादपूरणार्थमात्मानमपि शिरसा समर्पितवानित्यर्थः १८ हंसावतारमाह तुभ्यमिति भृशं विवृद्धभावेन
न॰५ प्रवृद्धस्नेहेन त्वया परिपृष्टः साकल्येन तुष्टो भगवान् हंसरूपेणोक्तिशेषः योगमनभिसंहितकर्मफलकर्मयोगं ज्ञानं भागवतं साधनसम्यकानु

नार्थो बलेरयमुरुक्रमपादशौचमापः शिखाधृतवतो विबुधाधिपत्यं यो वै प्रतिश्रुतमृते न चिकीर्ष
दन्यदात्मानमङ्ग शिरसा हरयेभिमेने १८ तुभ्यं च नारद भृशं भगवान्विवृद्धभावेन साधुप
रितुष्ट उवाच योगं ज्ञानं च भागवतमात्मसतत्त्वदीपं यद्वासुदेवशरणा विदुरंजसैव १९
चक्रं च दिक्ष्वविहतं दशसु स्वतेजो मन्वंतरेषु मनुवंशधरो बिभर्षि दुष्टेषु राजसु द
मं व्यदधाः स्वकीर्तिं सत्ये त्रिपृष्ठ उशतीं प्रथयंश्चरित्रैः २० राम राम राम राम रामः

तुधा॰१
गृहीतभगवद्भजनात्मकं ज्ञानमात्मस्वरूपप्रकृतिविविक्तात्मस्वरूपतत्त्वं यथा त्वं तस्य दीपवत्प्रकाशकं ज्ञानयोगं च साधु यथा तत्त्वमनु
वा घटते तथा ख्यातमेकादशे स्फुटं यदेवं हंसोक्तयोगादिकं वासुदेवशरणा वक्तारो जन्मनाम तदित्युक्तरीत्या उपायत्वेन वासुदेवशरणा ग
ताः अञ्जसा सुखेन विदुः हंसोक्तमेव ज्ञात्वानुतिष्ठंतीत्यर्थः १९ तत्तन्मन्वंतरावतारमाह चक्रमिति मनुवंशधरः मनुवंशपालकः ति॰२
सन् मन्वंतरेषु दशसु दिक्ष्वप्रतिहतमत्र अभिमानं स्वतेजः स्वप्रतापोपबृंहितं चक्रं साक्षाद्रूपं चक्रं बिभर्षि किं च दुष्टेषु गर्वितेषु राजसु दमं दण्डं
व्यदधाः साधितवान् कथंभूतः सन् त्रिपृष्ठे तृतीयस्थानादिविरहत्वेन सत्यलोके स्वचरित्रैः उशतीं कमनीयां कीर्तिं प्रथयन्विस्तारयन् व्यद
भ॰२ धादित्यर्थः २०

तस्मादुलूकिकायाऽपूतनाउलूकिकेतिनामांतरं वा २ नभ्मासमनभविष्य २

मि बिभर्मि पालयामि विश्वं दुश्चरं मे वीर्यं प्रभवः २४ एवं भगवता नुगृहीतो ब्रह्मा स्वबुद्ध्यभिमतमर्थं प्रार्थयन् तस्मै निवेदयति भगवन्निति हे भगव
न् सर्वभूतानां गुहां हृदयकुहरमवस्थितोऽधिष्ठितः अत एवाध्यक्षः सर्वद्रष्टा त्वं अप्रतिरुद्धेन प्रज्ञानेन चिकीर्षि
तमपरस्य प्रार्थितमेवाह परावर इति परं दिव्यात्मस्वरूपमवरं रूपं चिदचिदात्मक महद्रूपिणः कर्मापत्ताम्तद्रूपरहितस्यैतेतव परावरे

त्व १ इत्यादि द्वयं मयात्मनोऽधिकर्मविमोहिते तपो मे हृदयं साक्षादात्माहं तपसोऽनघ २२ सृजामि तपसैवेदं ग्रसामि तपसा पुनः बिभर्मि तपसा
विश्वं वीर्यं मे दुश्चरं तपः २४ ब्रह्मोवाच भगवन्सर्वभूतानामध्यक्षोऽवस्थितो गुहां वेद ह्यप्रतिरुद्धेन प्रज्ञानेन चिकीर्षितं २५ तथा
पि नाथमानस्य नाथ नाथय नाथितं परावरे यथारूपे जानीयां ते त्वरूपिणः २६ यथात्ममायायोगेन नानाशक्त्युपबृंहितं विलुम्पन्वि
सृजन्गृह्णन्बिभ्रदात्मानमात्मना २७ क्रीडस्यमोघसंकल्प ऊर्णनाभिर्यथोर्णुते तथा तद्विषयां धेहि मनीषां मयि माधव २८

रूपे यथा जानीयां तथा मनीषां बुद्धिं देहीत्यन्वयः २९ द्वितीयं नाथितमाह यथेति नानाशक्त्युपबृंहितः परास्य शक्तिर्विविधैव
श्रूयते स्वाभाविकी ज्ञानबलक्रिया चेति श्रुत्युक्तज्ञानबलादिभिरुपबृंहितः पुष्टः द्वितीयान्तपाठे नानाशक्तिभिः पञ्चविंशतित
त्वात्मकशक्तिभिरुपबृंहितमभिव्याप्तं विश्वमात्ममायायोगेनस्वेन आश्चर्यशक्तियोगेनात्मनानिमित्तभूतेन आत्मना
त्मानं स्वं चिदचिद्विशिष्टं उपादानं तदात्मानं स्वयमेव रक्षतेऽतिप्रसादादात्मानमुपादानत्वस्याच्युतेति निमित्तत्वस्य चाभि
ति १ धानाद्विलुम्पन्निति पुनःसंहारः गृह्णन्निति प्राप्यात्पसंहारः विसृजन्नवस्थादिरूपेण बिभ्रत्पुष्णन् २७ अमोघसंकल्पः सत्यसंकल्पः ऊर्ण
नाभिर्यथा तंतून् ऊर्णुते आच्छादयति सृजतीति यावत् तद्यथा क्रीडसि तथा तद्विषयां मनीषां बुद्धिं माधव लक्ष्मीनाथ मयि धेहि देहीत्यन्व

यः तथा अहं नैव रूपेण अस्य ...? २९

चेतना२ सं२ त्यक्ष२

श्री·भा· टि·टी· ८५ यथेति सर्वगतमप्याकाशं वायुतेजोम्भसि पथिव्यादिषु नानाविधेष्वमेध्येषु भौतिकेषु घटादिषु प्रविष्टमपि विशालीव घटादिगतभेदच्छे-
दनाय व्यस्थत्वान्नयाहमपि तेषु चेतनेष्वात्मतयानुप्रविष्टोपि तेषु न प्रविष्टः नतस्तद्दोषैः स्पृष्ट इत्यर्थः यद्वापरिच्छिन्नचेतनवस्तु प्रवेशेपि स्वस्यापरिच्छिन्नत्वं
मद्दृष्टान्तमाह यथेति अप्रविष्टानि बहिरपि सन्ति तथाहमत्र हि स्थितः सर्वं व्याप्नोतिपु कारणोतेषु प्रविष्टोहं न तेषु वै बहिरपि व्याप्त इत्यर्थः ३५ एवमपरि किंत२
च्छिन्नत्वप्रतिपादनेनयावानहमिति तस्य स्पष्टीकृतं अहमेवासमेवाग्र इत्यत्र जगत्कारणत्वे प्रतिपन्नचेतनाचेतनवैलक्षण्यप्रतिपादनेन ज्ञातोहं सर्वशक्ति-
त्वादिप्रतिपादनेन यथाभावस्तत्तस्य स्पष्टीकृतं ऋतेर्थमित्यादिना परमात्मशरीरस्य नपरस्परविलक्षणचेतनाचेतनस्वरूपप्रतिपादनेनय
द्रूपमिति स्पष्टीकृतं तथा तेषु प्रपञ्चेन चेतनाचेतनयोः परमात्मशरीरत्वप्रतिपादनात् शरीरगता धर्माः जीवात्मनः तच्छरीरगत बालत्वयुवत्वा
दयस्तथा शरीरस्य चेतनतारामेव धर्माः इति यद्गुण इत्यस्य मिश्रितं अहमेवासमित्यनेनमहत्त्व पालकत्वसंहर्तृत्वरूप जगद्व्यापार

45 यथा महान्ति भूतानि भूतेषूच्चावचेष्वनु प्रविष्टान्यप्रविष्टानि तथा तेषु न तेष्वहं ३५ एतावदेव जिज्ञास्यं तत्त्वजिज्ञासुनात्मनः अन्वयव्यतिरे
काभ्यां यत्स्यात्सर्वत्र सर्वदा ३६
रूपकर्मप्रतिपादनेन यत्कर्मकत्वमित्यस्य स्पष्टीकृतं पुनरन्तर्यामित्वरूपविलक्षणस्वरूपसंग्रहेण वक्ष्यन्त कृ१
स्यैव जिज्ञास्यत्वमाह एतावदिति आत्मनः परमात्मनः तत्त्वस्वरूपं जिज्ञासुना ज्ञातुमिच्छुना एतावदेव परस्परविलक्षणत्वभावचिदचिदन्तरात्म
जि६ त्वतमगावस्वरूपमेवान्वयव्यतिरेकाभ्यां मयोगात्पयोगाभ्यां अवच्छेदभ्यावृत्तिर्भ्यामित्यर्थः एवं जिज्ञास्यमेवेत्यन्वयः नान्यज्जिज्ञास्यमिति व्यतिरेकः य
दात्मया मद्भावश्चित्स्वरूपविशरीरकपरमात्मनःएकात्म्याकारणात्मनाच सद्भावाद्व्यतिरेकाच्चिदचिच्छरीरकपरमात्मनोतिरिक्तवस्तुनः अभावादे
वमतपरमात्मविविज्ञानेन सर्वविज्ञानाद्भूतत्वात्तद्भावादेतावदेवजिज्ञास्यमेवेत्यर्थः प्रधानेन तद्रूपं भगवत्स्वरूपं चेतनं चेतनं च नाद्विमतिमतमिति
तज्ज्ञानस्य मगावज्ज्ञाने नान्तर्भावादात्मनत्तत्त्वं त्वस्तु संग्रहेण प्रकृतिपुरुषवैलक्षण्यमाह यत्स्यादिति यदात्मनस्तत्त्वं मत्स्वरूपं सर्वदा स्यादित्य
विद्यावृत्तिः क्वचित् प्रतिक्षणपरिणामित्वेन पिण्डत्वघटत्वकपालत्वचूर्णत्वरजस्त्वरूपेणाचाघवस्थास्तु पूर्वपूर्वावस्थाना राम:
...योपस्थाभावास्सर्वदानास्ति शब्दार्हत्वात्तत्... सर्वदास्तिशब्दार्हत्वमिति भावः ३६ ८५
चे३

मतत्र ८३

मावानित्यस्यार्थमवस्फुटयन्नुधात्यतयाज्ञातव्यपरशब्दोक्तं भगवत्स्वरूपमाह अहमिति सदसत्परं चेतनाचेतनविलक्षणं यद्वस्तु तन्मेवा सम ८८
भवमन्यत्र चिदचिद्विलक्षणं न भवत्य सम्यग्वा चिदचिदंतर्गतं अहमेवतद्विलक्षण इत्यर्थः अग्रेसर्गे प्राक्पश्चाद्यत्पश्चा सृष्टिकाले जातं चे
५२ तत्कार्यं जातं तदप्यहं कार्यं चिदचिद्रूपं यस्मादहमित्यर्थः संहारकाले योवशिष्येत सोऽप्यहमेवेत्यर्थः प्रकृतिपुरुषविलक्षणत्वे
शरीरकस्त्वहमेक एव सर्वशक्तिः सर्वेश्वरः सृष्टेः प्रागविभक्तनामरूपसूक्ष्मप्रकृतिपुरुषशरीरकः सृष्टिकाले विभक्तनामरूपप्रकृतिपुरुषश
रीरकः स्वपर्यन्तनामरूपस्त्रामसंहारविषयोप्यहमेवेत्यर्थः एवं कारणावस्थायामविभक्तनामरूपप्रकृतिपुरुषशरीरकत्वेन कार्यावस्थायां वि
भक्तनामरूपप्रकृतिपुरुषशरीरकत्वेनावस्थितस्यापि परमात्मनः स्वैरी रमनचेतनाचेतनागतानन्तदुःखविवक्षमेवशरीरिणामिव
जडत्वादिमिविकारैर्नात्मनः तच्छरीरगतबालत्वयुवत्वस्थविरत्वादिभिः स्पर्शो न ऋते नाचेतनवैलक्षण्यमविकृतमेवावतिष्ठते

अहमेवासमेवाग्रे नान्यद्यत्सदसत्परं पश्चादहं यदेतच्च योऽवशिष्येत सोऽस्म्यहं ३२ ऋतेऽर्थं यत्प्र
तीयेत न प्रतीयेत चात्मनि तद्विद्यादात्मनो मायां यथाभासो यथा तमः ३४ राम राम ॥॥

५१

कार्यत्वे कारणत्वे च स्वशरीरभूतप्रकृतिपुरुषगतविकारैरनुपपन्नमित्यत्र माध्यादिषु विस्तरो द्रष्टव्यः ३३ एवं चिदचिद्विलक्षणस्य परमात्मनः स्वरूप
मुक्तं अथावरशब्दोक्तं संगतयाज्ञातव्यं चिदचिद्रूपमाह ऋतेऽर्थमिति अर्थं निरतिशयपुरुषार्थभूतं चिन्नत्वमते विना यदचिद्वस्तु प्रती
येत प्रकृत्यनुसंधानवेलायामात्मस्वरूपेण यथावस्त्वप्रकाशत इत्यर्थः आत्मनि चेतनस्वरूपे प्रतीयमाने सातिशयपुरुषार्थतानुगुणेति
न त्यायेन यदचेतनं प्रतीयेत तदात्मनः मायां विद्यादित्यर्थः अन्यतरस्य प्रकाशनेनान्यतरस्य प्रकाशने विरोधित्वादित्यभिप्रेत्य तत्र दृष्टांतमा स्थाय
ह यथाभासो यथा तमइति आभासआभासं भास्वरशब्दवकुवचनात्तो वानदिते नमितमो भातिन चतमसि तेजो भातितद्वदित्यर्थः स्थूलत्वसूक्ष्मत्व
नित्यत्वजडत्वादिविरुद्धाकारयोगोमिप्रेतः एवं परस्परविलक्षणं चिदचित्स्वरूपमुक्तं अथैतयोः स्वस्यानुप्रवेशेन तत्प्रशासनरूपं पारतंत्र्यं
तदंगमितितदंगतयाज्ञातव्यत्वेन प्रतिपादयति २ तदेवास्पार्थं चा॥

श्रीभा॰ तमनुतिष्ठंतं पितरं हरिकथादानां पुत्राणां मध्ये प्रियव्रतमेव नारदः शीलादिभिः पर्येतीति बयादित्य नारायणान्वयः प्रियव्रत मत्वमेवाह अनुव्रतः पित
श्रीधरी॰ रमेव मानः स्वमम्बमाणः श्रीलेन काम संशीलेन तत्वमावेन तमक्षणा वित्तयेवा विप्रियमनेन बकाराद्धर्मेणानांतरिद्धिपनित्यहेणोच ४१ मायामिति
लिमिष्ठ माया पाधिप्रपत्य विसा संपन्नान्यायाम्बत्वसंशाक्षिविविदिष्वेविदितुमिष्ठत ४२ तथमिति लोकानां प्रपितामहत्त्व स्वपितरं व्र
४६ त्याणानुयंस्वपरिचर्ययासंतुष्टं निशा सम्यक् त्वा देवर्षिर्नारदः सबालां प्रतिपदनुपृष्ठमि अनुपृष्टवांल देवपरिपप्रच्छ ४३ तस्मैपुव तेनारद
यदंभगवता चतुःश्लोकात्मनाम संक्षेपेणा उक्तं दशलक्षणायुपरीत नाध्याये नैर्देशं सिद्धिरितिं गणाचत श्लोकामपिसर्गश्चोद्गा धी: लं दशो ४
के ह्मंगुह्येण सूचिताः तथाहि अहमेवासमितिश्लोकेन भगवतः सृष्टिस्थितिसंहारकारणत्वोक्त्या आश्रयसर्गपोषणानिरोधानामुक्तिः यतेनैव स
र्वकारणत्व हृत्सर्वातिशायित्वोक्त्या वैकुंठविजयरूपस्थितिरप्युक्ता यच्चादरूप्यदेतत्स्वत्वेनकायंचिदचिद्रूपव्याप्तिसर्गस्यापिचतुर्भुरत्वश री

४६ वयाः२ तं नारदः प्रियतमो रिक्थादानामनुव्रतः शुश्रूषमाणः शीलेन प्रश्रयेण दमेन च ४१ मायाविविदिषन् विष्णोर्मायेशस्य म
हामुनिः महाभागवतो राजन् पितरं पर्युतोषयत् ४२ तथेतिशम्पपितरं लोकानां प्रपितामह देवर्षिः परिपप्रच्छ भवा
न्यन्मानुपृष्ठति ४३ तस्मा इदं भागवतं पुराणं दशलक्षणं प्रोक्तं भगवता प्राह प्रीतः पुत्राय भूतकृत् ४४ नाराय

कर्ष रेखकाणाक त्वाज्ञाविसर्गोपिसंगृहीतः यद्दरविविक्ष [illegible] प्रकृतिपूरुषरूपशोधकेन तेर्थ मितिश्लोके नाम रूपाप्रतीतिदर्शायां माया
स्वरूपप्रतीतिकथनादात्मस्वरूपाप्रतीतिमायाप्रतीत्योरनादिकर्मवासनामात्रत्वप्रतीतेः कर्मवासनारूपाऊतयोपिसूचिता यथाम
न४ हांतिभूतानीतिश्लोके सर्वान्तरात्मतया प्रशासितत्वरूपपालकत्वेनैव पालनाधिकृतभगवदवतारकथानां भगवदनुवर्तिमन्वादिक
थानामपिसूचितत्वेनमन्वंतरेशानुकथेयपिसूचिते परमपुरुषशरीरप्रतिविलक्षणजीवस्वरूपशोधनेनप्रकृतिविनिर्मुक्तिः किर्य ५२
म२ नगुणाधकपरमात्मकत्वरूपेणावस्थितिर्मुक्तिरित्यपि सूचितं एवंदशार्थसंग्रहेणाचतुःश्लोकमपिसूचिताः अतएवैतद्दिल रामः
णरूपेवादशस्कंधे [illegible] पुरा [illegible] दशार्थानां प्रतिपादनमुपपद्यते अतेंद्र प्राप्रीतः प्राह ४४ ४४

व्या ८ सर्वत्रेति सीवर्तते इति: तस्याविकृतत्वेन सर्वदा स्यादिवस्तुंशकत्वेपि वालाग्रशतभागस्यैतात्पुत्र प्रकारेण जीवस्वरूपस्याणुपरिमाणत्वेन स
र्वत्रस्यादितिवक्तुमशक्यत्वात् एवमविकारत्वानंतत्वकथनेन ससंज्ञानमनंतं ब्रह्मेत्युक्तं ब्रह्मस्वरूपलक्षणमभिहितं भवति ३६ एवं परा
वरपर्यालपेण नीयाते इस्यस्यानंतरमुक्तं नेहमानः प्रजासर्गं बध्येयमित्यस्योत्तरमाह तदिति परमेण समाधिना चित्तैकाग्र्येणा तन्मतं स समा
म्यगनुतिष्ठ भवंतिति संहाराद्यधिकतरं ब्रह्मादेरप्युपलक्षणं कल्पविकल्पेषु सृष्टिसंहारेषु कल्पः कल्पनं सृष्टिः विकल्पो विपरीतकल्पनं
संहारः कर्हिचित्कदाचिदपि न मुह्यति अस्मदधीनत्वमनुसंधाय समस्तकर्मदायकत्वेन भविष्यतीत्यर्थः अनेनैव तद्विषयां धेहि मनीषामित्यस्य
प्युत्तरमुक्तं भवति ३७ संप्रदिश्येति अजनः कर्मायत्तोत्पत्तिशून्यः हरिर्भगवान् जनानां अधिभूतानां परमेष्ठ्याधिपत्ये स्थितं प्रतिएवमुक्त्वा प्र

एतन्मतं समातिष्ठ परमेण समाधिना भगवान्कल्पविकल्पेषु न विमुह्यति कर्हिचित् ३७ श्रीशुक उ०
संप्रदिश्यैवमजनो जनानां परमेष्ठिनं पश्यतस्तस्य तद्रूपमात्मनो न्यरुणद्धरिः ३८ अंतर्हितेंद्रियार्थाय
हरये विहितांजलिः सर्वभूतमयो विश्वं ससर्जेदं स पूर्ववत् ३९ प्रजापतिर्धर्मपतिरेकदा नियमान्य
मान् भद्रं प्रजानामन्विच्छन्नातिष्ठत्स्वार्थकाम्यया ४० श्रीमते रामानुजाय नमः॥ ॥ ॥

स

कारेण संप्रदिश्य तस्य परमेष्ठिनः पश्यतः सतः तच्चतुर्मुखाय प्रदर्शितमात्मनः संबंधिरूपं न्यरुणत्तिरोभावयामास ३८ अंतर्हि
तानि तिरोधापितः इंद्रियार्थाः चक्षुरिंद्रियविषयः प्रत्यक्षरूपं येन तस्मै हरये विहितः रचितः अंजलिर्येन सः सर्वभूतमयः सर्वभूतप्र
चुरः सत्यमाणदेवादिभूता तं विद्धिस्यत्वेन भूतविषयकज्ञानप्रचुर इत्यर्थः स ब्रह्मा इदं विश्वं पूर्ववत्पूर्वकल्पवत् ससर्ज ३९ तद
नंतरं पृष्टौ ब्रह्मनारदसंवादः प्रवर्तते इत्याह प्रजापतिरिति पंचभिः धर्मपतिर्भगवत धर्माणां प्रवर्तकत्वेन गोप्ता प्रजापतिः ब्रह्मा
प्रजानां भद्रं मंगलमन्विच्छन् विभ्राट् स्वार्थकाम्यात्मप्रयोजनेच्छातया कदाचिद्यमान्नियमांश्चा तिष्ठदनुष्ठितवान् इत्यर्थः ४०

स्व१ ध्रियम्त१ वा१ दी१ नो

श्री·भा· अन्येषां दशानां लक्षणमाह भूतेति भूतान्याकाशादीनि मात्राणि तन्मात्राणि शब्दादीनीन्द्रियाणि ज्ञानकर्मभेदेन्द्रियाणि धीशब्दैः अन्तःकरणं महत्तत्त्व-
द्वि·टी· त्रिशब्दैर्वोच्यते महत्तत्त्वपरो महदहङ्कारपरिवृत्तानामित्यर्थः एतेषां यत्तज्जन्म उत्पत्तिः स सर्ग इत्युदाहृतः ब्रह्मणः परस्माद्ब्रह्मणः प्रयोजकात्
४७ तु गुणानां सत्वरजस्तमसां वैषम्याद्धेतोः योऽयमस्य तु सर्वसम्बन्धी प्रयोजनस्य चतुर्मुखकर्तृक इत्यर्थः एवंभूतः सर्गो [illegible] विसर्गः स्मृतः ३ वै- कु३
ठविजयः वैकुण्ठस्य हरेः सर्वोत्कर्षः शत्रुविजयादिरूपः स्थितिः तस्य वैकुण्ठस्य योऽनुग्रहः जगद्रक्षणरूपः स पोषणमित्यर्थः सद्धर्मः मन्वन्तरे वै-
कुण्ठानुगृहीतानां मन्वन्तराधिपतीनां यो धर्मः स मन्वन्तरानुकथनं कर्मवासनाः कर्मणः वासनाः संसाराः ऊतय उच्यन्ते क्रमतत्त्वविवक्षितः
४ ईशानुकथां विवृणोति अवतारेति हरेरवतारानुचरितं तदनुवर्तिनां एतदनुवर्तिनां पुंसां च नानाख्यानोपबृंहिताः विचित्रकथाभिरुक्ता

भूतमात्रेन्द्रियधियां जन्म सर्ग उदाहृतः ब्रह्मणो गुणवैषम्याद्विसर्गः पौरुषः स्मृतः ३ स्थितिर्वैकुण्ठविजयः पोषणं तदनुग्रहः मन्वन्तराणि
47 सद्धर्म ऊतयः कर्मवासनाः ४ अवतारानुचरितं हरेश्चास्यानुवर्तिनां पुंसामीशकथाः प्रोक्ता नानाख्यानोपबृंहिताः ५ निरोधोऽस्यानु-
शयनमात्मनः सह शक्तिभिः मुक्तिर्हित्वान्यथारूपं स्वरूपेण व्यवस्थितिः ६ आभासश्च निरोधश्च यतश्चाध्यवसीयते स आश्र-
यः परं ब्रह्म परमात्मेति शब्द्यते ७

[illegible]श्चेशानुकथा इत्यर्थः ५ निरोधलक्षणमाह निरोध इति अस्य जीवात्मनः सह शक्ति-
भिः कर्मशक्तिभिः सहानुशयनं तद्भावस्थास्थितिर्निरोध इत्यर्थः मुक्तिलक्षणमाह मुक्तिरिति अन्यथाभावं देवादिरूपं हित्वा स्व-
रूपेण विस्मृतापहतपाप्मत्वादिगुणाष्टकविशिष्टेन रूपेणावस्थानमेव मुक्तिरित्यर्थः ६ आश्रयलक्षणमाह आभास इति आसर्ग- ति३
प:३ तात्प्रलयान्तमाभासः जगत आविर्भावः निरोधः प्रलयः यतः यस्मादध्यवसीयते ज्ञायते येनावगम्यते [illegible]
तिरोभावः आविर्भावतिरोभावौ जन्मनाशौ विकल्पवदित्युक्तेः यच्च परब्रह्मादिशब्दैः शब्द्यते अध्यवसाय्य तेस आश्रय इत्यर्थः ७ अथा- गमः
श्रयस्य परमात्मनः कारणत्वायद्युक्तं स वेद तावत् ज्ञातृज्ञेयज्ञानकरणानां भगवदात्मकत्वमाह ४७

स्क०१ अथ नारदः सरस्वत्या नद्याः तटे परमं ब्रह्म ध्यायते ध्यानं कुर्वते ऽपरिमिततेजसे मुनये वेदशास्त्रार्थतत्त्वावगन्त्रे व्यासाय प्राह प्रोक्तवान् व्या
सस्तु मह्यं प्रोक्तवानित्येतत्तु अधीतवान् द्वापरादौ पितुर्द्वैपायनादहमिति पूर्वमेवोक्तं ४५ एवं संप्रदायागतश्रीभागवताख्यानेनैव
वल्लक्षणं ब्रह्मज्ञानामृतात्रापमिधास्यामीत्याह यदुतेति इदं विश्वं वैराजात् वैराडाख्यानिरूपकस्रष्टाच्चतुर्मुखाद्यथा आसीदिति यच्च
प्राऽहं पृष्टः अजः सृजति भूतानि भूतात्मा यदनुग्रहादिना तदुपाख्यास्ये भागवताख्यानेनोत्तरग्रन्थेनाथ ब्रह्मान्कारेणेनोपाख्यास्ये इत्य
र्थः एवं यत्र शेते इत्यस्योत्तरमुक्तं भवति परमयोगमकथनाद प्राक्तनस्तुद्भक्तत्वमपलोक्य पारीग्रहस्य कथनेन स्वरं जीवव्याप्तभिर्देहारंभ ब्रह्म स्क०२
परि० प्रत्युक्तः अन्यत्र व्याप्तिकथनान्नारिछिन्नत्वमपि हृतं ४६ इति द्वितीये नवमः ९ अथ वैराजात्पुरुषाद्यदिदं यथासीत्तदुपाख्यास्ये इ

नारदः प्राह मुनये सरस्वत्यास्तटे नृप ध्यायते ब्रह्म परमं व्यासायामिततेजसे ४५ यदुताहं त्वया पृष्टो वैराजात्पुरुषादिदं
यथासीत्तदुपाख्यास्ये प्रश्नानन्यांश्च कृत्स्नशः ४६ इति श्रीमद्भागवते महापुराणे द्वितीयस्कंधे श्रीनारायणाच्चतुःश्लोकीभाग
वतप्रवृत्तिवर्णनं नाम नवमोऽध्यायः ९ श्रीशुक उ० अत्र सर्गो विसर्गश्च स्थानं पोषणमूतयः मन्वंतरेशानुकथा निरोधो मुक्ति
राश्रयः १० दशमस्य विशुद्ध्यर्थं नवानामिह लक्षणं वर्णयंति महात्मानः श्रुतेनार्थेन चांजसा २ राम रामः

तिष्ठति ज्ञानं समष्टिपुरुषश्चतुर्मुखाख्यवैदे वादिन् ... मिथ्यास्यैवत्पुराणं दशलक्षणं प्रोक्तं भगवतेति प्रस्तुतौ दशार्थाना स्क०१
ह अत्रेति अस्मिन्पुराणे सर्गादयश्चाश्रयांता दशार्थाः प्रतिपाद्या इत्यर्थः मन्वंतरेशानुकथा मन्वंतरकथनं ईश्वरचे
ष्टाकथनं चेत्यर्थः १ नन्वेवं प्रतिपाद्यानां बहुत्वात्प्रतिपाद्यभेदाच्छास्त्रभेदः स्यादित्याशंक्याह दशमस्येति इह पुराणे दशम
स्याश्रयस्य परब्रह्मणः विशुद्ध्यर्थं बोधनार्थं नवानां सर्गादीनां लक्षणं स्वरूपं वर्णयन्ति महात्मानः परापरयाथात्म्यज्ञाः श्रु
तेनार्थेन यथाश्रुतं वर्णयंति एवं च दशमस्यैव प्राधान्येन तद्व्यतिरेकेण तो यावता प्रतिपादनाच्छास्त्रभेद इत्यर्थः २

श्री:भा अस्यैव प्रभावमाह द्रव्यमिति द्वाभ्यां यदनुग्रहतः सन्तिमन्नारायणः इत्यन्वयः द्रव्यं महदादि पृथिव्यंतभूतवर्गः कर्मजीवादृष्टं कालः गुणवैषम्य
द्विती: हेतुः स्वभावः प्रकृतेः परिणामस्वभावः यदनुग्रहतः यस्यानुग्रहतः उपेक्षया न संतिद्रव्यादयो यस्य संकल्पानुविधायित्वात् न ह्यपितिष्ठंति प्रवर्तिका इत्य सेति २
४८ न्वयः १२ एवंभूतो नारायण एकः अभिव्यक्तनामरूपः स्वस्य चिदचिच्छरीरकत्वेनैकः नानात्वं देवमनुष्यादिरूपेण भवितुमिच्छन् योगः स्वा
त्मानुभवरूपो योगः स एव तल्पः शय्या तस्मात् समुत्थितः देवः स्वशरीरभूतं हिरण्मयं रमणीयं वीर्यं चिदचिदात्मकं कारणद्रव्यं मायया स्वतु
र्मुखरूपेण त्रिधा करणं ज्ञातृज्ञेयरूपेण व्यसृजत माययाशब्दः स्वगुणरजःप्रचुरचतुर्मुखपरः संकल्पपरः वा संकल्पेन चतुर्मुखरूपी भू
त्वा व्यसृजदित्यर्थः १३ अविधमविवरणोति अधिदैवमिति अधिदैवं दिगादिदेवताधिष्ठितः एकादशेन्द्रियरूपकरणवर्गः अध्या

42

द्रव्यं कर्म च कालश्च स्वभावो जीव एव च यदनुग्रहतः संति न संति यदुपेक्षया १२ एको ना
नात्वमन्विच्छन् योगतल्पात्समुत्थितः वीर्यं हिरण्मयं देवो मायया व्यसृजत् त्रिधा १३ अ
धिदैवमथाध्यात्ममधिभूतमिति प्रभुः अथैकं पौरुषं वीर्यं त्रिधाभिद्यत तच्छृणु १४

त्मं ज्ञातृवर्गः अधिभूतमिति पृथिव्यादिभूतस्पर्शगंधादिज्ञेयवर्गः उक्तमिति त्रिधा प्रभुर्व्यसृजदित्यर्थः ज्ञातृत्वं हि नाम जीवानां तत्त
देवादिदेहयोगसंपादनमेव तथाहि तेषां न जीवानां स्वत्वतज्ज्ञत्वमिति तौ पशरीरत्वात् तज्ज्ञातृत्वभूतसंघपरिणामदेवादिशरीरविशिष्टत्वेना दि २
कारेण विसृष्टा इत्यर्थः अथ संग्रहणोक्तं देवादिसृष्टिशरीरस्यांतःप्राणेन्द्रियादीनां चतुर्मुखशरीरस्य प्राणेन्द्रियादिसमष्टित्वमिति
प्रकारं प्रतिपादयितुं प्रतिजानीते अथेति पौरुषं समष्टिपुरुषचतुर्मुखदेहगतं पुरुषाधिष्ठितमेकं समष्टिरूपेणैकं वीर्यं व्यष्टिका
रणद्रव्यं त्रिधाकरणभोक्तृविषयरूपेण देवादिव्यष्टीनां यथा निरभिद्यत उपपद्यत तच्छृणु इत्यर्थः मन्त्र इति शेषः १४ एवं प्रति राम:
ज्ञाय व्यष्टीन्द्रियसमष्टिविभागं वक्तुं इन्द्रियाश्रयप्राणव्यष्टिसृष्टिमाह ॥ ४८

ज्ञातृज्ञानकरणालक्षणोऽ२ प्रज्ञामात्राश्चार्पिता७

पश्यति आत्मनि जीवे ज्ञातरि नियन्तृतया वर्तमानत्वा आध्यात्मिकोऽयं पुरुषः सोऽसावेवाधिदैविकः देवेषु ... चक्षुरादीन्द्रियाभिमानिष्वादित्या

स१२ दिषु वर्तमानश्चैव उभयविच्छेदः उभयविधो विच्छेदो भेदो यस्य स उभयविच्छेदः ज्ञातृज्ञानकरणालक्षणोऽज्ञेयः शब्दादिराकाशादिभूतेषु वर्तमानत्वाद्यः शब्दा

ज्ञाता३ दिविषयतया वर्तमानोऽयमसावाधिभौतिकः स्मृतः इत्यर्थः ज्ञानकर्याशब्दादिज्ञेयं च भगवदात्मकमित्यर्थः ८ एवं त्रयाणां भगवदात्मकत्वमभिधायैतस्य स

र्वेशतां वक्तुं जीवानामसर्वज्ञतामाह एकमिति यथा एकतराभावे चक्षुरादिकरणाभावे एकं विषयं नोपलभामहे न साक्षात्कुर्महे चक्षुरादिकरणाभावे सन्नि

हितमपि विषयं न पश्यामः नेत्रज्ञानाभिविधसन्निकर्षवस्तु पदार्थेषु करणाधीनज्ञाना न तु स्वतः स्वबाह्यनादिज्ञानवन्तः न च करणानपेक्षज्ञाना नाश्रेत्य

र्थः परमात्मा तु कोऽपि चित्रयतावानाकर्तृत्वाच्चित्रतयमिति तत्र तदा त्रितयं ज्ञातृकरणज्ञेयानां त्रयाणां वेद साक्षात्कुर्यात्स्वात्माश्रयाश्रयः आवि

८७ दाश्रो जीवस्याप्याश्रयः यथा रथस्यारा रथनेमौ अर्पिता नाभावराश्चार्पिता एवमेवैता भूतमात्राः प्रज्ञामात्राः प्राणेऽर्पिता इति श्रुतेः स्वाश्रयाश्रय इति या

योऽध्यात्मिकोऽयं पुरुषः सोऽसावेवाधिदैविकः यस्तत्रोभयविच्छेदः सस्मृतो ह्याधिभौतिकः ८ एवमेकतराभावे यदा नोपलभामहे त्रितयं तत्रयो

वेद स आत्मा स्वाश्रयाश्रयः ९ पृथग्भूतो विनिर्भिद्य यदा लोकान् विनिर्गतः आत्मनोऽयनमन्विच्छन्नपोऽस्राक्षीच्छुचिः शुचीः १० तास्ववात्सीत्स्व

सृष्टासु सहस्रपरिवत्सरान् तेन नारायणो नाम यदापः पुरुषोद्भवाः ११

ठत्वस्याप्याश्रयः अन्येषामप्याश्रय इत्यर्थः ९ एवमाश्रयपर्यन्ता न

र्थानभिधाय पर्यवसितं तदुपाख्यास्य इति प्रतिज्ञातं च तदुक्ते हि प्रकारं वक्तुमारभते पुरुष इति पुरुषस्तु शिवरूपी अस्तो परमात्मा आत्म न

त्वस्यायनं स्थानमन्विच्छन् विमृशन् यतः स्वयमपि रत एव शुचीः शुचिराश्रयः असृजत् ... १० तास्वपासु स्वसृष्टासु सहस्रपरिवत्सरा

नवात्सीत् उवास एतदेव नारायणशब्दप्रवृत्तिनिमित्तमित्याह तेनेति पृथग्भूतात् पुरुषोद्भवाः पुरुषात्परमपुरुषादुद्भवा उत्पन्नाः पुरुषाद्भूता

यासां इति वा नाराश्चापः आपनं यस्येति शेषः तेनेह ... येनावयवनं तत्वेऽपि निमित्तेन नारायणो नारायणशब्दवाच्यो

भूदित्यर्थः नामेतिस्मृतं तत्र प्रसिद्धिं द्योतयति तथा हि स्मर्यते आपो नारा इति प्रोक्ता आपो वै नरसूनवः अयनं तस्य ताः

पूर्वं तेन नारायणः स्मृत इति ११

पुरुषोन्

श्री भा॰
द्वि॰ टी॰
५६

वोऽभ्युत्थिततिमाह विवक्षोर्वै क्रमिकोऽभूत् मुखं भवतः मुखे ततः मुखाद्वह्निः वागभिमानिदेवता वागिंद्रियं तयोरिंद्रियतदभिमानिदेव
तयोराधारस्थानं आस्यं जातमुक्तिस्थानमिति स्पष्टः एवं सर्वत्र अखिलशरीरात् समष्टिभूतान्न भि॰ विशेषविभाग उच्यते न चैवं च तन्मुखस्यैवंविध
योऽत्यन्ति दि॰ निवर्तकं पुरुषं उपरि हस्तौ हस्तौ हनू इति हस्तद्वयोऽत्यन्तिकथनेन चतुर्मुखस्य द्विवर्जत्वाभावात् देवादिशरीरस्य हस्तादिव्याहिपु
स्य विभागस्यास्यैवं चिन्तत्वात् प्राणेंद्रियमभ्युत्थितिमाह गले इति तत्स्य ब्रह्मणः गले कंठे सुचिरं वायोरिति विशेषः वायोर्निरोधः समा
जायते स्पष्टः जलेऽतिपाठेन भवतीत्य न्वयः १९ निरोधान्न भवतीत्याह दोधूयतीति अत्यन्तं प्रचलति सति नासिके नासापुटे निरभिद्येतां
वंगु आधारं कुर्वतो ब्रह्मणः शरीरे वायुरुद्धिते नासिके निरभिद्येतां ब्रह्मशरीरे वायोः क्षोभित्वान्नासाविवरान्नासाव्यक्ष योभवान्

विवक्षोर्मुखतो भूम्नो वह्निर्वाग्व्याहृतं तयोः गले चैतस्य सुचिरं निरोधः समजायत १९ नासिके निरभिद्येतां दोधूयति
नभस्वति तत्र वायुर्गन्धवहो घ्राणो नसि जिघृक्षतः २० यदात्मनि निरालोकमात्मानं च दिदृक्षतः निर्भिन्ने ह्यक्षिणी तस्य ज्यो
तिश्चक्षुर्गुणग्रहः २१ बोध्यमानस्य ऋषिभिरात्मनस्तज्जिघृक्षतः कर्णौ च निरभिद्येतां दिशः श्रोत्रं गुणग्रहः २२ तमरामः

स्पष्टः २० चक्षुरभ्युत्थितिमाह यदेति यदा आत्मनि देहे निरालोकं अर्थाभावे अपि भावः आलोकाभावः आसीदिति विशेषः तदा आत्मा
नं देहं च काशादम्भवत्वादिरूपनलस्य ब्रह्मणः अक्षिणी अधिष्ठानं निर्भिन्ने चक्षुरिंद्रियस्य अक्षिगुणमात्रात्मा नी स्पष्टः च
क्षुरादिरिंद्रियं गुणग्रहं रूपग्रहमाह कं ज्योतिरादित्य अधिष्ठानमित्यर्थः क्वचिच्चक्षुरभिमानी आदित्यश्चक्षुर्भूत्वाऽक्षिणी
प्राविशदिति श्रुतेः २१ श्रोत्राभ्युत्थितिमाह बोध्यमानस्येति ऋषिभिर्वेदैः बोध्यमानस्य अबोध्यमानस्य तत्प्रबोधं ग्रहीतुमिच्छतः
आत्मनो ब्रह्मणः कर्णौ अधिष्ठानं दिशः श्रोत्राभिमानिदेवता गुणग्रहः शब्दग्रहणहेतुः श्रोत्रमिंद्रियं निरभिद्यतेत्यर्थः श्रोत्रेंद्रियमाह

६३

श्रीराम॰
५६

न:३

अन्तरिति पुरुषस्य चतुर्मुखस्य विचेष्टतः प्राणव्यापारं कुर्वतः चतुर्मुखे प्राणव्यापारं कुर्वति सतीत्यर्थः अन्तः शरीरे तच्छरीरान्तःस्थितादाकाशादाका
शकार्याद्वा पुरुषविशेषात् ओजः सहो बलं जज्ञे ओजः इन्द्रियसामर्थ्यं सहः वेगसामर्थ्यं बलं धारणसामर्थ्यं एते धर्मा अभवन्नित्यर्थः ततश्चतुर्मुखशरी
रगतेभ्यः सहोबलधर्मेभ्यः प्राणो महानसुः महान्मुख्यः असुः प्राणनहेतुः जज्ञे इतरेषां शरीरान्तर्वर्तिप्राणानामभवदित्यर्थः प्राण इत्येकवचनमार्षं ज्ञात्यभि
प्रायं वा १५ तस्य महत्त्वमेवाह अनुप्राणन्तीति प्राणा इन्द्रियाणि [illegible] सर्वजन्तुषु प्राणन्तं [illegible] तं चेष्टां कुर्वन्तं अनुप्राणन्ति चेष्टां कुर्वन्ति अपानन्तं चेष्टां
त्यजन्तं प्राणमनु पश्चात्सर्वे प्राणाः अपानन्ति चेष्टां त्यजन्ति नरदेवं राजानमनु भृत्या इव सर्वेषामिन्द्रियाणि प्राणाधीनवृत्तीनीत्यर्थः यद्वा समष्टिप्राण ५४
नोपकरणत्वमानुवर्तित्वमाह अन्विति चतुर्मुखशरीरस्थं समष्टिप्राणमनु स्वस्वभावानुवर्तिनः ओज आदि सामर्थ्ययुक्ता एव व्यष्टिप्राणाः प्रा
णापानादिव्यापारं कुर्वन्तीत्यर्थः १६ अथ समष्टिप्राणस्य सदेवतस्य सविषयस्य जिह्वेन्द्रियस्योत्पत्तेर्मूलं प्राणो [illegible] हेतुकत्वं स्पष्टयन्नाह प्राणेन

अन्तःशरीर आकाशात्पुरुषस्य विचेष्टतः ओजः सहो बलं जज्ञे ततः प्राणो महानसुः १५ अनुप्राणन्ति यं प्राणाः प्राणन्तं सर्वजन्तुषु अपा
नन्तमपानन्ति नरदेवमिवानुगाः १६ प्राणेन क्षिपता क्षुत्तृडन्तरा जायते विभोः पिपासतो जक्षतश्च प्राङ्मुखं निरभिद्यत मुखतस्तालु
निर्भिन्नं जिह्वा तत्रोपजायते ततो नानारसो जज्ञे जिह्वया योऽधिगम्यते १८

क्षिपता व्याप्रियमाणेन प्राणेन विभोश्चतुर्मुखस्य [illegible]
स्वेषां तदा जाठराग्नौ दीपिते क्षुत्तृट् अन्तरा जायते जायत इत्यर्थः ततः पिपासतः पातुमिच्छतः जक्षतः अत्तुमिच्छतश्चान्तरस्य प्रकोपानीति च
संबन्धस्य [illegible] प्राक् प्रथमं मुखं निरभिद्यत विभक्तमभवत् चतुर्मुखस्य अधिष्ठानशरीरस्य मुखं व्यक्तमभूदित्यर्थः १७ ताल्वधिष्ठानेन जिह्वेन्द्रियं नानार
सो विषयः वरुणश्च देवता तासां त्रयाणां एवं सर्वाधिष्ठानेन्द्रियदेवताविषया इत्येतच्चतुष्टयम् [illegible] तु क्रमस्य [illegible] मुखतालुगोविना जिह्वाया उत्पत्त्य
योगात् मुखोत्पत्तिरुक्तानन्तरमधिष्ठानं तथा अधिष्ठानं तु तालु एव अनेन तालुनः स्थिरत्वार्थाऽनुक्ता भवति वा गौणी क्रिया अथ मुखस्य यवयवस
दीनामुत्करेवादि देहयोगकरणमेव हि [illegible] तालुनि जिह्वामूलं निर्भिन्नं अधिष्ठानं [illegible] इत्यर्थः तत्र तालुनि जिह्वा उप
जायते उपजायत इत्यर्थः नानारसः कट्वम्लमधुरतिक्तादिरसः जज्ञे जिह्वया यः नानारसः अधिगम्यते ज्ञायत इत्यर्थः १८ श्रीमत्कमलायन्मः

श्री·भा·
द्वि·टी·
५७

अथ स्थानेंद्रियादीन्याह पद्भ्यामिति यज्ञो विष्णुः यज्ञो वै विष्णुरिति श्रुतेः यतः स्वयमेव पद्भ्यां इंद्रियैर्देवो द्विपस्य वा यस्य त्वास्यज्ञामिति द्विवचनांते
ईशः पद्भ्यां गतिसामर्थ्यं पादेंद्रियेण सह पादयोरधिष्ठितवानित्यर्थः नृभिः कर्मभिः गमनागमनादिभिः कर्मभिः हव्यं हविर्यद्द्रव्यं क्रि
यते तेषामयत्त इत्यर्थः गमनादिकं कर्म हव्यं विषय इत्युक्तं उपस्थस्य आह निरभिद्यतेति प्रजानंदामृतार्थिनः प्रजायां यत्समानं सेरतिः गुरु२
स्थानं इह हेतुत्वात् तस्याः तामपदममृतमुक्तं स्वर्गं तमर्थयतः प्रजाप्रजाः रत्यानंदरूपममृतं वार्थयतः ब्रह्मणः समभूदुपस्थतः शि
श्नः अभूत् उपस्थस्थानं निरभिद्यतेत्यर्थः शिश्नस्य इंद्रियो विरिंचिगमस्य उपलक्षणं शिश्नः अधिष्ठानं उपस्थ इंद्रियं प्रजापतिरधि
ष्ठातारतिः कर्म आनंदो विषय आश्रीदिसु कं कामादीनां स्त्रीसंभोगादीनां प्रियं तदुभयाश्रयं इंद्रियदेवताश्रयमित्यर्थः

50 पद्भ्यां यज्ञः स्वयं हव्यं कर्मभिः क्रियते नृभिः निरभिद्यत शिश्नो वै प्रजानंदामृतार्थिनः उपस्थ आसीत् कामानां प्रियं तदुभयाश्रयं
२६ उत्सिसृक्षोर्धातुमलं निरभिद्यत वै गुदं ततः पायुस्ततो मित्र उत्सर्ग उभयाश्रयः २७ आसिसृप्सोः पुरः पुर्या नाभिद्वारमपानतः त
त्रापानस्ततो मृत्युः पृथक्त्वमुभयाश्रयं २८ आदित्सोरन्नपानानामासन् कुक्ष्यंत्रनाडयः नद्यः समुद्राश्च तयोस्तुष्टिः पुष्टिस्तदाश्रये २९

उभयाश्रयं शिश्नलिंगाश्रयं इत्यर्थः इंद्रियतत्स्थानाश्रयं इति वा २६ पायुमुत्पत्तिमाह उत्सिसृक्षोरिति धातुमलं भुक्तान्नमलादि
नामसारांशं त्यक्तुमिच्छोर्गुदं पायोरिंद्रियस्थानं निरभिद्यत ततो गुदतः पायुरिंद्रियं मित्रो देवता तस्मात् उत्सर्गस्त्यागः उभयात्मकः उभयाश्र
यः इंद्रियतत्स्थानं चाश्रयो धातुमलत्याग इत्यर्थः २७ एवं स्थानकर्मभयेंद्रियमभिहितं स्वभिमभिधाय आसामपि नाभ्यादि अभिहिता उभयाश्र स्थिमाह२
तृ२ यं प्राणापानाश्रयं प्राणापानवायुवियोगो मरणं स्वपुराणां तत्प्रसिद्धं २८ आदित्सोरिति अन्नपानानामादित्सोः संग्रहेच्छोः कुक्षिं श्रीराम
अंत्रनाड्यः आसन् तत्र भवन् कुक्षिरिंद्रियस्थानं अंत्राण्यन्नसंग्रहे करणानींद्रियस्थानीयानि नाड्यस्तु पानसंग्रहे तयोर्नाड्यंत्रवर्गयोः क्रमेण ५०
नद्यः समुद्राश्च देवते तुष्टिः पुष्टिश्च वृत्ती तदाश्रये तत्र सर्वं दीसमुद्राश्रये सस्यादिहेतुत्वात् २९ श्रीमन्नारायणाय

त्वगिंद्रियव्युत्पत्तिमाह वस्तुनइति वस्तुनः कमस्पर्द्धत्वं काठिन्यं वस्तु लघुत्वं गुरुत्वं चै [illegible] स्पर्श इव दुष्प्रत्वं वा गुल्हत्वा [illegible] गहलायो श्री २
स्पत्वादो लं स्यन्तं गुरुं स्येति पाठे यत्तादेश [illegible] दः शीततां त्वां नगुल्मा न्निपद्यतेतः स्तोनुमिदं तत्वगिंद्रियमाहि हस्तनाद्यर्थः व
पृ३ सुनिहस्ते नानो लितेलघुत्वगुरुत्वयोः नत्वग्याह्यत्वगिंद्रियविषयत्वमितिज्ञेयं अत्रेदं बोधव्यं त्वगिंद्रियस्पर्शस्य स्थूलत्व वा ह्यान्तरच
मं गोद्वेष्याने स्थान मे स्पर्शं कंटुः स्पर्शश्चेति विषयभेदः विषय भेदान्नमहीदहाः [illegible] देवता हृयं त्वचमस्पविनिर्मिनोविविशेषपिमणोष
वायुश्च४ धोः मं रोनलोमभिः कंटूये रसो प्रतिपद्यते निर्भिन्ना मस्य च मोगिलोकपालो निलोविश्वनृशाणे नांचोनसंस्पर्शये नासो प्रतिपद्यते इति तत्तो येस्पह
मदिपात्यमानत्वात् एवं चैकमेव त्वगिंद्रियं वायुश्च मिमानलो मनुयानामोर्षिपिदेवताकं कंडूनाहकं पवनदेवानतावेदि अस्पर्शगस्त्वा वायुदेवताभि
ति रातदेवसंग्रहेण हतस्यामिति तस्यांत्वचि त्वगिंद्रियेनिर्भिन्ने नदपिसांगे रोमाणि अधिस्य न देवनाम हीदहा श्रोमन्नाद्यर्थः २३ अथस

वस्तुनो स्फुटिन्यं लघुगुरवो पमलानरां निपद्यतेनत्व निर्भिन्नानत्यारोमसमहाः २३ ततश्चानवदिर्वायुरुक्तं बालध्व गुरुणो हतः हस्तौ
स्तदनुस्तस्य नानाकर्म चिकीर्षया २४ तयोस्तु वलवानिंद्रः आदानमुभयाश्रयं गतिर्नािभिगोवतः पादौ स्तस्तनेमिकामिकं २५ श्री

शीमहंम [illegible] स्येवत्वगिंद्रियस्यवाय्व [illegible] त्वमाह ततश्च ततश्चैवत्वगिंद्रिये तातौ वायुर्वर्ततः अपिदिनवान् कथं स्तः त्वचा वाधि
शेषत्वगिंद्रियेल साधनेनो तर्वहि अलध्व गुरुणाः लघः स्पर्शः गुणो येनस्तंभं त वैश्यपो संयादकः इत्यर्थः प्राणिमाविस्तहि
माहहस्तावितिनानाकर्म आदानादिकर्म चिकीर्षतः लघ्व स्पर्शं कर्तुमिच्छतः तस्य प्रहराः स्तस्तुः तेगतासमशीतः हस्तु
गमस्पर्शयोश्च वनिर्स्त्थः अस्माने इंद्रियाधिष्ठात् कर्मातपाहरा निस्तत्तो अस्पृहा २४ तयोरिति तयोर्हि तयोः स्थानभूतयोः वलवा
सो२ न्यागिंद्रियाण्य रपर्थापवलसहितः इंद्रः [illegible] यिष्ठानमिन्द्रदेवउभयाश्रयं हस्तद्वयाश्रयमादानं कर्म [illegible] विषयस्तुइंद्रियहस्तद्वयगततया
दादानमपि हस्तद्वयाश्रयमित्यर्थः पादेंद्रियवाह्निस्तुसिमाह गतिमिति अभिकामे कामिह्यनुसारं गानिजिंयस्तनः गहलानुमि

दि२ नः

श्री·भा· रूतो विलक्षणं रूपांतरमस्तीत्याह अत इति अरूपं इतो कोऽपी न परः अव्यक्तस्यान्तत्वादन्य अदृष्टत्वानुपपत्तेः अतः स्थूलरूपात्परं परत्वेनाव्य
द्वि·टी० स्थितं सूक्ष्मं नृरवालायपशतभागस्येति श्रुत्युक्तं सूक्ष्मात्मतत्त्वरूपं रूपांतरमपि भगवतोऽस्तीति शेषः सूक्ष्मत्वं कुतः अव्यक्तं चक्षुरादिभिर्न
व्यज्यते इत्यव्यक्तं चक्षुराद्यग्राह्यं तत्कुतः निर्विशेषणं शब्दस्पर्शरूपादिगुणाभावाच्छब्दादिविशेषवदेव चक्षुरादिग्राह्यमिति भावः निर्विशेषणत्वं
५१ स्कः कुतः वाङ्मनसः परं देवमनुष्यादिबुद्धिशब्दागोचरं तदपि कुतः अनादिमध्यनिधनं आदिमध्यान्त्यशून्यं निधनं विनाशः मध्यमुत्पत्तिनिधनयोरंत १४
रालवस्थांतरं तदवस्थात्रयशून्यमित्यर्थः तदपि वा कुतः नित्यं कालापरिच्छिन्नमेवावस्थात्रयवदिति भावः ३४ एवं प्रकृतिमंडलातीतमुक्तात्म
स्वरूपं विशोध्य तं सदसद्रूपयोरुभयोः संसारस्याविद्याविच्छिन्नत्वान्मुक्तस्वरूपस्य निषिद्धत्वाद्योगिध्येयत्वापगमाद्युपासनातालंबनत
यास्यभाव्यत्वं प्रतिषेधयति अमुनाऽइति तेन उभे ते मया अनुवर्णिते भगवतः अमुनी स्थूलसूक्ष्मे रूपे न गृह्णंति नोपासते उपासका इति शेषः ३

अतः परं तत्कृतममव्यक्तं निर्विशेषणम् अनादिमध्यनिधनं नित्यं वाङ्मनसः परं ३४ अमुनी ^
भगवद्रूपे मयाते अनुवर्णिते उभे अपि न गृह्णंति मायासृष्टे विपश्चितः ३५ श्रीशुक उवाच

न१ पासका उपास्यत्वं भाव्यत्वेन गृह्णंतीत्यर्थः कुतः विपश्चितः सर्वज्ञस्य ब्रह्मणो मया सृष्टे संकल्पसृष्टे भगवत्संकल्पायत्तत्वे
न धर्मो त्वयोरित्यर्थः मर्त्यस्य संसारचेतनस्य विद्यावेष्टितत्वेनासुचलामुक्तस्वरूपत्वतः शुद्धिविरहाच्च नोपासनाविषयत्वं किं तादृशमपि वर्णितमिति स्प२
वेदांतसिद्धं परमात्मानो मूर्तरूपमेवोपास्यमित्यर्थः तथा च शौनके न चतुर्मुखसनकादीनां जगदंतर्वर्तिनाम विद्यावेष्टितत्वेन शुभाश्रयतानर्ह
तामुक्तानां च नामेव पश्चाद्योगेनोद्भूतबोधानां स्वस्वरूपापन्नानां च स्वतः शुद्धिविरहात् शुभाश्रयताप्रतिषेध उक्तः आब्रह्मस्तंबपर्यंता जगदंतर्व
वस्थिताः प्राणिनः कर्मजनितसंसारवशवर्तिनः एनतस्ते न ते ध्याने ध्यानिनामुपकारकाः अविद्यांतर्गताः सर्वे ते हि संसारगोचराः पश्चादुद्भूतबोधा रामः
श्च ध्याने नैवोपकारकाः नैसर्गिको न वै बोधस्तेषामप्यन्यतो यतः तस्मात्तदमलं ब्रह्म निसर्गादेव बोधवदित्यादिना प्राधान्येनोपास्यत्वनिषेधः ५१
भगवद्विग्रह इति लेनोपासनं लिङ्गमेव ३५ ॥ ॥

S1

मनो व्यष्टिसृष्टिमाह निरुध्यमानेति आत्ममायांत्वत्प्रतिरोधायकप्रकृतिं निरुध्यमानेर्निरूपयतः हृदयं कमलाकारमधिष्ठानं ततो
मनस्तद्वियचंद्रश्चाभिमानी संकल्पः मनोव्यापारः कामश्च इत्यर्थः ३० एवं ब्रह्मशरीरारंभमभिधाय तदवयवविशेषविभागमभिधाय तेषां
सार्वभौतिकत्वेपि तत्तद्भूतांशभूयस्त्वनिबंधनं तदात्मकत्वमाह त्वगिति चर्मस्थूलमंतस्त्वक् तदुपरिस्थितं सूक्ष्मं चर्म [illegible] त्वगाद
योऽस्थ्यंताः षट्कोशकाः ते तानिहि पार्थिवा एते सप्त धातवः भूम्यप्तेजोमयाः प्राणास्तु व्योमांबुवायुभिरारब्धा इति शेषः ३१ गुणात्मेति इंद्रिया
ग्र णि गुणात्मकानि शब्दादिगुणग्रहणस्वभावानि गुणाः पंचाशत्कात्मकत्वं तस्माद् भूतादेरिति अहंकारः तत्प्रभवाः शब्दादयो गुणा इंद्रिया ॥

निरुध्यमानेरात्मपायां हृदयं निरभिद्यत ततो मनस्ततश्चंद्रः संकल्पः काम एव
च ३० त्वक्चर्ममांसरुधिरमेदोमज्जास्थिधातवः भूम्यप्तेजोमयाः सप्त प्रा
णो व्योमांबुवायुभिः ३१ गुणात्मकानींद्रियाणि भूतादिप्रभवा गुणाः
मनः सर्वविकारात्मा बुद्धिर्विज्ञानरूपिणी ३२ एतद्भगवतो रूपं स्थू
लं ते व्याहृतं मया मह्यादिभिश्चावरणैरष्टभिर्बहिरावृतं ३३

याणि पि तत्प्रभवत्वात्तदात्मकान्येवेत्यभिप्रायः मनः सर्वविकाराणां कामसंकल्पादीनामात्माश्रयः बुद्धिः विज्ञायते
इति॰ नेनेति विज्ञानं मनस्तद्रूपिणी बुद्धिः मनोबुद्धिलक्षणविवेचनात् ३२ उपसंहरति एतदिति एतच्चेतनाचेतनात्मकं दे
वादिव्यष्टिवस्तुजातं गर्भमेतत् ब्रह्मांडकलेवरं पृथिव्यप्तेजोवाय्वाकाशाहंकारमहदव्यक्तरूपैरष्टभिरंडावरणैर्बहि
रावृतं भगवतः स्थूलरूपं ते तुभ्यं मया व्याहृतमभ्यगाहीति ३३

मोहबहुलत्वात् नारकशब्दः स्थावराद्युपलक्षकः २

स्थावरादिरूपतामसकर्मफलभूता २ मसीसुर मध्यमादुःखमिश्र त्वात् २

गी.म. एतदेव प्रपंचयति सत्वमिति सार्द्धेन सत्वं सात्विककर्मफलरूपादेवत्वप्राप्तिहेतुत्वमानुषत्वप्राचुर्यात् रजोगतिर्मनुष्यता सि

गी.वि. [illegible] तमोगतिर्नारकिता नीचेत्यर्थः तत्रापि सात्विकराजसतामसनरनारका सुगतिषु पिपदे

५२ केचन तरः सात्विकादिः स्वभावः [illegible] एतान्यामवशिष्टान्यां स्वभावानामपां उपहन्यते सुविध्यते अभिभूयत इत्यर्थः ५१

प्रति४ नरापेकेषतः [illegible] एके वेन्निधागतयोमिश्रितेयथा रात्रि [illegible] केचित्केवलरजः प्रचुराः केचित्सत्वप्रचुराः केचि

सा४ त्तमः प्रचुराः एवं सात्विकतामसाअपि प्रत्येकं त्रिधेत्यर्थः एतेन यावत्सः कर्मगतप्रकल्पस्याप्युत्तरमेवं भवति ५२ एवं ब्र

ह्मांतर्यामित्वेन मत्त्वसमभिधाय माहात्म्यं लापितन्वमाह महति जगद्धाता जगत्स्रष्टा स एव भगवान् तिर्यङ्नरसुराः म

भिः तिर्यञ्चो वराहमीनकच्छपहंसादयः नरा राम कृष्णादयः सुरा वामनहयग्रीवादयः एतैरवतारैरिह विश्वस्याय

सन्त्वं रजस्तम इति त्रिधा गुणाः नरनारकाः तत्राप्येके कपोरा जनमिश्रं नेगतयाविधा यदे के के तरोर्ध्वं स्वभाव उपहन्यते ५१ स

एवेदं जगद्धाता भगवान् धर्मरूपधृक् पुष्णाति स्थापयन् विश्वं तिर्यङ्नरसुरात्मभिः ५२ ततः कालाग्निरुद्रात्मा यः सृष्टमिदमात्मनः

सन्नियच्छति कालेन घनानीकमिवानिलः ५३ इत्थंभावेन कथितो भगवान् भगवत्तमः नेत्थंभावेन हि परं द्रष्टुमर्हन्ति सूरयः ५४

पत्यालयन् धर्मरूपधृक् धर्मशरीरकः सन्पुष्णाति संवर्द्धयति ५२ रुद्रशरीरकत्वेन संहर्तृत्वमाह ततइति कालाग्निरुद्रात्मा का

लाग्निरुद्रात्मा शरीरं यस्य सः कालाग्निरुद्रस्यात्मभूत इति वा स भगवान् पालनमत्ताः सृष्टं पश्चिस्वतन्कालेकल्पांते संनि यच्छ

ति संहरति अनिलो वायुर्मेघसमूहमिवेति दृष्टांतः ५३ जगद्व्यापारमेव जीववत्कर्मपरवशो वा न स्यादित्यत्राह इत्थमिति इत्थं भावेन

जगत्स्रष्टृत्वादिभावेन प्रयुक्तः भगवत्तमः ज्ञानादिपूर्णतमः भगवान् कथितः सम्यक् प्रतिपादितः सूरयो ब्रह्मविदः इत्थंभा

नवित्सिद्रूपेण परं केवलं द्रष्टुं नार्हन्ति किं तु तद्विलक्षणत्वेन द्रष्टुमर्हन्ति भगवान् भगवत्तम इति विशेषणद्वयं जीववैलक्ष ॐः

ण्यप्रतिपादनार्थं जीवस्य भगवत्त्वात् तद्व्यापारः कर्माधीनः परमात्मनः कर्तृत्वं कर्माधीनमिति भावः ५४ ५२

52

स्थूलस्य भगवद्रूपत्वमेवोपपादयितुं भगवत एव ब्रह्मादिरूपेणावस्थानमाह स इति भगवान् वाच्यवाचकतयावस्थितः जगद्धरी
वाचकेः २ रूपत्वाद्वाच्यतयावस्थितः आकाशशरीरकत्वाच्च [illegible] काशगुणशब्दरूपेणावस्थितः ब्रह्मरूपधृत् चतुर्मुखरूपधृत् नामरूपक्रिया
धत्ते ब्रह्मरूपधृ [illegible] [illegible] शास्त्रयोनि ब्रह्मविष्णुचतुर्मुखशरीरकादित्यवगम्यते नामदेवादिनामरूपं देवादिरूपं क्रिया तत्तत्कृत्यानि
रूपे ४ धत्ते स्वपर्यन्तनामक्रियाः व्यकरोति यथा नामरूपं च भूतानां कृत्यानां च प्रपंचनं वेदशब्देभ्य एवादौ देवादीनां चकार स इति कर्ष
मतो विधत्ते कर्मकः अकर्मवपुः स कर्मी संकल्पमात्रव्यापारः ३६ नामरूपक्रियाधानमेव प्रपंचयति प्रजापतीनित्यादिना

स वाच्यवाचकतया भगवान् ब्रह्मरूपधृत् नामरूपक्रिया धत्ते सकर्माकर्मकः परः ३६
प्रजापतीन्मनून्देवानृषीन्पितृगणान्पृथक् सिद्धचारणगन्धर्वान्विद्याधरासुरगुह्यकान्
३७ किन्नराप्सरसो नागान्सर्पान्किंपुरुषोरगान् मातॄ रक्षःपिशाचांश्च प्रेतभूतविनायकान् ३८
कूष्माण्डोन्मादवेतालान्यातुधानान्ग्रहानपि खगान्मृगान्पशून्वृक्षान्गिरीन्नृपसरीसृपान् ३९
द्विविधाश्चतुर्विधा येऽन्ये जलस्थलनभौकसः कुशलाकुशला मिश्राः कर्मणां गतयस्त्विमाः ४०

तीर्यातान्तां धत्ते इत्यनेनान्वयः तत्र प्रजापत्यादिनामानि तद्वाच्यानि रूपाणि तत्कर्माणि च ज्ञेयानि पृथक् तत्तदवान्तरभेदेन गिरीन्
त्यस्यान्तं रूपेति संबोध्यते ३७ ३८ ३९ चतुर्विधा जरायुजाण्डजस्वेदजोद्भिज्जरूपेण चतुर्विधाः पुमांश्च देवो नरो नपुंसकश्चेत्यपांस्यः
चतुर्विधा विभेदाः यं स्तद्ध्न देवादिरूपेण चतुर्विधाः ये च स्थावरजंगमभेदेन द्विविधाः जलस्थलनभ ओकांसि येषां तान् विधत्ते इति पू
र्वेणान्वयः ऋच्येकरूपेणैव किं न धत्ते इत्यत आह कुशलेत्यादिना कर्मणां हेतुत्रयपुण्यरूपाणां कर्मणां [illegible] प्राप्यागतयः फलानि कु
शला उत्तमाः अकुशला नीचाः मिश्रा मध्यमाः कर्मणां विचित्रत्वात् फलानामपि वैचित्र्यमिति भावः ४०

श्री·भा·
द्वि·टी·
५३

पुरुषोऽयुं विविति भिधिम्या दिनोक्तमर्थमुपसंहरति अयंत्विति ब्रह्मणः अयंकल्पः अवांतरकालविभागैरुदाहृतः दिङ्मात्रत्वेनोक्तः अस्मिन्कल्पस्वकल्पांतरेपि सदृश इत्याह विधिरिति यत्र महाकल्पेप्राकृता महदादि सृष्टिमंतः सर्गा वैकृताः पृथिव्यादि विकारारब्धाः सर्गाः इत्ययं विधिः प्रकारः अन्यैर्मन्वादिकल्पादिभिः साधारणः समानः एते नुपुरुषावयवैर्लोकाः सपालाः पूर्वकल्पिता इत्यादिनोद्भावितः धातायथापूर्वमित्यादिश्रुति विरोधः परिहृतः पुरुषावयवानां चोपासनार्थं सियुक्ता इत्यपरे शश्वतिकल्पं हरेर्क
नी५ ल्पे विरोधभावात् ४७ वक्ष्यमाणं तु विस्तरं प्रतिजानीते परिमाणमिति कालस्य परिमाणं सूक्ष्मस्थूलं च परिमाणं कल्पस्य लक्षणम्
यथा नैव रूपलक्षणं विग्रहमवांतरकल्पमन्वंतरादि रूपं च यथा यथा वक्ष्यामस्तृतीयस्कंधे व्याख्यास्ये विस्तरेण कथयिष्ये पाद्मं

अयं तु ब्रह्मणः कल्पः सविकल्प उदाहृतः विधिः साधारणो यत्र सर्गाः प्राकृतवैकृताः ४७ परिमाणं च कालस्य कल्पलक्षण रा०९
मं०२ विग्रहं यथा पुरस्ताद्व्याख्यास्ये पाद्मं कल्पमथो शृणु ४८ शौनक उ० यदाह नो भगवान्सूत सत्ता भागवतोत्तमः चचार तीर्थानि
भुवस्त्यक्त्वा बंधून्सुदुस्त्यजान् ४९ कुत्र कौशारवेस्तस्य संवादोऽध्यात्मसंश्रितः यद्वा स भगवांस्तस्मै पृष्टस्तत्त्वमुवाच ह ५०

तथा च पाद्मं कल्पमथो शृणु इत्यर्थः ४८ एवं स्थिते शौनकः इत्यभिव्याहृतं राजा निशम्य भरतर्षभ इत्यादिना व्याहृतस्य
राजकृतप्रश्नस्य वैयासकिरिति वचनेन त्वात्मनस्य ब्रूपमात्मन इत्यादिना तस्तेनोक्तं शुकोक्तं मत्वा पुनरपि राजकृतप्रश्नान्तरमेव
रा०४ तत्त्वकोक्तानुत्तरेण विदुर मैत्रेय संवादरूपेण श्रोतुकामः पृच्छति यदाहेति त्रिभिः हे सूत भागवतश्रेष्ठः भगवानुत्पत्तिप्रलयं चैव भूतानां
मागतिं गतिं वेत्ति विद्यामविद्यां वेत्युक्तगुणसंपन्नः योसौ क्षत्ता विदुरः सुदुस्त्यजान् बंधून्निबंधू त्यक्त्वा भुवः पृथिव्याः सर्व धी
नि तीर्थानि चचार ४९ कुत्रेति तस्य विदुरस्य कौशारवेर्मैत्रेयस्य च कुत्र प्रदेशेऽध्यात्मसंश्रितः अध्यात्मविषयः संवादः ३०
वादः भूतपृष्टः विदुरेण पृष्टः स भगवान्मैत्रेयः तस्मै विदुराय यद्वापदेव तत्त्वमुवाच तत्तत्रः ब्रूहीत्युत्तरेण त्वयः ५० ५३

ननु स एव स्रष्टा सच सर्गकर्त्ता पोषामजन्मादिं च तत्कर्त्तारं मां विद्ध्यकर्त्तारमव्ययमित्यादिना सर्जकत्वमपरस्यापि कर्तृमकर्तृत्वं चा वगम्यते तत्कथं घटते इत्याशंक्य विधिनिषेधयोर्विषयव्यवस्थानेन दर्शयति नेति अस्य जगतः कर्माणि सर्गादीनि परस्य परमात्म नः जन्मादिर्नानुविधीयते परमात्मनः स्वरूपेणास्य न भवति ननु स्रष्टृत्वं तत्वतो नेत्यपि न हि विरोधः इत्याशंक्य उच्यते तस्मादजत्वं स्वरूपे णास्यत्वं तु सर्गादिकमित्यविरोध इत्यर्थः कर्तृत्वाकर्तृत्वविरोधं परिहरति कर्तृत्वमिति माययारोपितं यत् जीवे ह्यारोपितं शाकृतकरणे केलेवरसापेक्षं जीवगतकर्तृत्वं यत्तदेव प्रतिषेधार्थं प्रतिषेध विषयं कर्तृत्वमात्मन कर्तृत्वं नु विधीयते इत्यविरोध इत्यर्थः कामाद्य त्पत्तिर्नान्यमेवापेक्षेति प्रकृत्यधीनकर्तृत्वाभावो हि स्रष्टृत्वेतः प्रतिषेधार्थमित्यंशेऽपि देवविषयपरः अर्थः साक्षिवर्षमोऽसद्दति प्रसिद्धेः कर्माणि जन्मादि परस्यानुविधीयते कर्तृत्वप्रतिषेधार्थमित्यपि पाठः तत्रायमर्थः ननु जीववित्तविलक्षणत्वेन परमात्मनः सुकं कथमेतदुपपद्यते जीववदस्यापि

नात्मकर्माणि जन्मादीन्परस्यानुविधीयते कर्तृत्वप्रतिषेधार्थं माययारोपितं हि तत् ॥ ४६

अकर्मादिदर्शनादित्वमेवाह नात्मेति अस्य चिदचिदात्मकप्रपंचस्य जन्मादीनि कर्माणि च यत्तज्जन्मादि लिप्येत नीति मत्यन्तं तु तत्त्वप्रपंचानुसा

५२ क०२ रिजन्मादिमित्यर्थः परस्य परमात्मनो न विधीयते प्रपंचवत्तन्मायया जन्मादिकं परमात्मनो न विधीयते न प्रतिपाद्यते अजायमानो बहुधा

विजायत इत्यादि वेदवाक्ये इति शेषः परमात्मनो जन्मादिकमेव कर्मापन्नमिति निष्कृतोक्त्या न्यायइत्यत आह कर्तृत्वेत्यादि हि यस्मात्

५४ जन्मकर्मादिकं मायया परमात्मनि किंपुनः सर्वमस्य रूपज्ञानेन मायोपपत्तं ज्ञानमिति ज्ञानपर्यायोऽत्र मायाशब्दः मायया सततं वेत्ति प्राणिनां च शु

भाशुभमिति प्रयोगात् कर्तृत्वप्रतिषेधार्थं मायया तत्कर्तृत्वस्य प्रतिषेधार्थं प्रतिषेधार्थं रोपितं तत्व स्मिन्निति शेषः मदीयजन्मकर्मादि कं जीववज्जन्मकर्मापन्नमिति प्रदर्शनाय स्वेच्छयैव तत्व स्मिन्देवमानुषजन्मकर्मादिकमारोपितं गृहीतमित्यर्थः तथा च भगवतैव गी यते अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन् प्रकृतिं स्वामधिष्ठाय संभवाम्यात्ममाययेति ॥ ४६

भू हीति तदिदं तत्त्वं सौम्य हे सूत विदुरस्य विचेष्टितं बंधुत्यागनिमित्तं यत्तदपि पुनः यथा येन प्रकारेणागतवान् तं प्रकारं च त्वत्तोऽस्माभिः श्रुतं
भा॰ द्वि॰ स्यर्थः ५१ सूतत्वं भवत्सु सर्वं राज्ञा प्रोक्तं प्रतिपृष्ट ततः शुको त्रिभिर्भगवदीयप्रश्नस्यापि उत्तरमित्याह राज्ञेति परीक्षिता राज्ञा स्वात्मसम
टी॰ १॰ तान्पृष्टो महामुनिः श्रीशुकः यन्मे त्रयोक्तं पृष्टो यदवोचत् तद्वो राजप्रश्नानुसारतः राजप्रश्नानुक्रमेणाव शुक्रम्य ममभिधास्ये वक्ष्य
५८ । प्रियेषु शृणुत श्रवणं कुरुतेत्यर्थः नृपमिति शेषः ५२ इति श्रीवत्सान्वयपयःपारावारसुधाकरस्य सर्वविद्यानि

ऊहितं तदिदं सौम्य विदुरस्य विचेष्टितं बंधुत्यागनिमित्तं च यथैवागतवा
न् पुनः ५१ सूत उ० राज्ञा परीक्षिता पृष्टो यदवोचन्महामुनिः तद्वोऽभिधास्ये शृणुत रा
ज्ञः प्र श्नानुसारतः ५२ इति श्रीमद्भागवते महापुराणे अष्टादशसाहस्र्यां संहि
तायां द्वितीयस्कंधे दशलक्षणवर्णनं नाम दशमोऽध्यायः १० समाप्तोऽयं द्वितीयस्कं
धः शुभं भवतु कल्याणमस्तु समाप्तोऽयं द्वितीयस्कंधः॥ श्री ०॥

धेः श्रीशैलगुरोः सुतेन तच्चरणकमलपरिचर्याप्रसन्नतत्कृपासमधिगतश्रीमद्भागवतार्थहृदयेन श्रीवत्सवदातेन
श्रीवीरराघवविदुषा विलिखितायां श्रीमद्भागवतचंद्रिकायां द्वितीयस्कंधदीपिकायां दशमोऽध्यायः १०
श्रीमते रामानुजाय नमः श्रीवेंकटेशाय नमः श्रीमन्नारायणाय नमः ग्रंथश्लोकसंख्या मूल ५२५ टीका
३० ७५ समाग्र ३६०० श्रीरामचंद्राय नमः ॥ श्रीकृष्णाय नमः रामचंद्राय नमः ॐ